# श्रीकृष्णाष्टकम्

वसुदेवसुतं देवं कंसचाणूरमर्दनम्।
देवकी परमानंदं कृष्णं वंदे जगद्गुरुम्।। १

अतसी पुष्प संकाशं हार नूपुर शोभितम्।
रत्नकंकण केयूरं कृष्णं वंदे जगद्गुरुम्।। २

कुटिलालक संयुक्तं पूर्णचंद्र निभाननम्।
विलसत् कुंडल धरं कृष्णं वंदे जगद्गुरुम्।। ३

मंदारगंध संयुक्तं चारुहासं चतुर्भुजम्।
बर्हिपिंछावचूडांगं कृष्णं वंदे जगद्गुरुम्।। ४

उत्फुल्ल पद्म पत्राक्षं नील जीमूत सन्निभम्।
यादवानां शिरोरत्नं कृष्णं वंदे जगद्गुरुम्।। ५

रुक्मिणी केळि संयुक्तं पीतांबर सुशोभितम्।
अवाप्ततुलसी गंधं कृष्णं वंदे जगद्गुरुम्।। ६

गोपिकानां कुचद्वंद्व कुंकुमांकित वक्षसम्।
श्रीनिकेतं महेष्वासं कृष्णं वंदे जगद्गुरुम्।। ७

श्रीवत्सांकं महोरस्कं वनमाला विराजितम्।
शंख चक्र धरं देवं कृष्णं वंदे जगद्गुरुम्।। ८

फलश्रुति
कृष्णाष्टक मिदं पुण्यं प्रात रुत्थाय यः पठेत्। ९
कोटिजन्म कृतं पापं स्मरणेन विनश्यति।।

# श्रीलक्ष्मी अष्टोत्तरशतनामस्तोत्रम्

(देव्युवाच)
देव देव! महा देव! त्रिकालज्ञ! महेश्वर! ।
करुणाकर! देवेश! भक्तानुग्रह कारक! ।।
अष्टोत्तर शतं लक्ष्म्याः श्रोतु मिच्छामि तत्त्वतः ।
(ईश्वर उवाच)
देवि! साधु! महाभागे! महा भाग्य प्रदायकम् ।।
सर्वैश्वर्यकरं पुण्यं सर्वपाप प्रणाशनम् ।
सर्वदारिद्र्य शमनं श्रवणात् भुक्ति मुक्तिदम् ।।

राजवश्यकरं दिव्यं गुह्याद्गुह्यतरं परम् ।
दुर्लभं सर्वदेवानां चतुष्षष्टि कळास्पदम् ।।
पद्मादीनां वरांतानां निधीनां नित्य दायकम् ।
समस्त देव संसेव्यं अणिमाद्यष्ट सिद्धिदम् ।।
किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकम् ।
तव प्रीत्याऽद्य वक्ष्यामि समाहितमना श्शृणु ।।
अष्टोत्तर शतस्यास्य महालक्ष्मीस्तु देवता ।
क्लीं बीजपद मित्युक्तं शक्तिस्तु भुवनेश्वरी ।।
वंदे पद्मकरां प्रसन्न वदनां सौभाग्यदां भाग्यदां
हस्ताभ्यां अभयप्रदां मणिगणैः नानाविधैः भूषिताम् ।
भक्ताभीष्ट फलप्रदां हरिहर ब्रह्मादिभि स्सेवितां
पार्श्वे पंकज शंखपद्मनिधिभिः युक्तां सदा शक्तिभिः ।।
सरसिजनयने! सरोजहस्ते! धवळतरांशुक गंधमाल्यशोभे!।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि! प्रसीद मह्यम्।।
प्रकृतिं विकृतिं विद्यां सर्वभूत हित प्रदाम् ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ।। १
वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम्।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ।। २
अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम् ।
नमामि कमलां कांतां क्षमां क्षीरोद संभवाम् ।। ३
अनुग्रह परां ऋद्धिं अनघां हरि वल्लभाम् ।
अशोका ममृतां दीप्तां लोकशोक विनाशिनीम् ।। ४
नमामि धर्मनिलयां करुणां लोक मातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुन्दरीम् ।। ५
पद्मोद्भवां पद्ममुखीं पद्मनाभ प्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगंधिनीम् ।। ६
पुण्यगंधां सुप्रसन्नां प्रसादा भिमुखीं प्रभाम् ।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीम् ।। ७
चतुर्भुजां चंद्ररूपां इंदिरां इंदु शीतलाम् ।
आह्लाद जननीं पुष्टिं शिवां शिवकरीं सतीम् ।। ८
विमलां विश्व जननीं तुष्टिं दारिद्र्यनाशिनीम् ।
प्रीतिपुष्करिणीं शांतां शुक्ल माल्यांबरां श्रियम् ।। ९
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् ।

वसुंधरां उदारांगां हरिणीं हेम मालिनीम् ।। १०
धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम्।
नृपवेश्म गता नंदां वरलक्ष्मीं वसुप्रदाम् ।। ११
शुभां हिरण्य प्राकारां समुद्र तनयां जयाम् ।
नमामि मंगळां देवीं विष्णुवक्षस्स्थल स्थिताम् ।। १२
विष्णुपत्नीं प्रसन्नाक्षीं नारायण समाश्रिताम् ।
दारिद्य्र ध्वंसिनीं देवीं सर्वोपद्रववारिणीम् ।। १३
नवदुर्गां महाकाळीं ब्रह्मविष्णु शिवात्मिकाम् ।
त्रिकालज्ञान संपन्नां नमामि भुवनेश्वरीम् ।। १४
लक्ष्मीं क्षीर समुद्रराज तनयां श्रीरंगधामेश्वरीं
दासीभूत समस्त देव वनितां लोकैक दीपाङ्कुराम् ।
श्रीमन्मन्द कटाक्षलब्ध विभव ब्रह्मेंद्र गंगाधरां
त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वंदे मुकुंदप्रियाम् ।।
मातर्नमामि कमले! कमलायताक्षि !
श्रीविष्णुहृ त्कमलवासिनि! विश्वमातः!
क्षीरोदजे! कमल कोमल गर्भगौरि!
लक्ष्मि!प्रसीद सततं नमतां शरण्ये ।।
त्रिकालं यो जपेत् विद्वान् षण्मासं विजितेन्द्रियः ।
दारिद्र्य ध्वंसनं कृत्वा सर्व माप्नोत्ययत्नतः ।।
देवीनाम सहस्रेषु पुण्य मष्टोत्तरं शतम् ।
येन श्रिय मवाप्नोति कोटिजन्म दरिद्रतः ।।
भृगुवारे शतं धीमान् पठेत् वत्सरमात्रकम् ।
अष्टैश्वर्य मवाप्नोति कुबेर इव भूतले ।।
दारिद्र्य मोचनं नाम स्तोत्र मंबापरं शतम् ।
येन श्रिय मवाप्नोति कोटिजन्म दरिद्रतः ।।
भुक्त्वा तु विपुलान् भोगान् अन्ते सायुज्य माप्नुयात् ।
प्रातःकाले पठेत् नित्यं सर्वदुःखोपशान्तये ।।
पठंस्तु चिन्तयेत् देवीं सर्वाभरण भूषिताम् ।।
इति श्री लक्ष्म्यष्टोत्तर शतनामस्तोत्रं संपूर्णम्

# श्रीविष्णु सहस्त्रनाम स्तोत्रम्

पूर्व पीठिक

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशान्तये ।। १
यस्य द्विरद वक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये।। २
व्यासं वसिष्ठनप्तारं शक्तेः पौत्र मकल्मषम् ।
पराशरात्मजं वंदे शुकतातं तपोनिधिम् ।। ३
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ।। ४
अविकाराय शुद्धाय नित्याय परमात्मने ! ।
सदैकरूप रूपाय विष्णवे सर्वजिष्णवे ।। ५
यस्य स्मरणमात्रेण जन्मसंसार बन्धनात् ।
विमुच्यते नम स्तस्मै विष्णवे प्रभविष्णवे ।। ६
ओं नमो विष्णवे प्रभविष्णवे ।

श्रीवैशंपायन उवाच

श्रुत्वा धर्मा नशेषेण पावनानि च सर्वशः ।
युधिष्ठिर श्शांतंनवं पुनरे वाभ्यभाषत ।। ७

युधिष्ठिर उवाच

कि मेकं दैवतं लोके किंवाऽप्येकं परायणम् ।
स्तुवंतः कं क मर्चंतः प्राप्नुयुः मानवा श्शुभम् ।। ८
को धर्म स्सर्वधर्माणां भवतः परमो मतः ।
किं जपन् मुच्यते जन्तुः जन्म संसार बंधनात् ।। ९

श्री भीष्म उवाच

जगत् प्रभुं देवदेवं अनन्तं पुरुषोत्तमम् ।
स्तुवन् नामसहस्रेण पुरुषः सततोत्थितः ।। १०
तमेव चार्चय न्नित्यं भक्त्या पुरुष मव्ययम् ।
ध्यायन् स्तुवन् नमस्यंश्च यजमान स्तमेव च ।। ११
अनादि निधनं विष्णुं सर्वलोक महेश्वरम् ।
लोकाध्यक्षं स्तुव न्नित्यं सर्वदुःखातिगो भवेत्।। १२
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्ति वर्धनम्।
लोकनाथं महद्भूतं सर्वभूत भवोद्भवम् ।। १३
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवै रर्चे न्नर स्सदा ।। १४

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ।। १५
पवित्राणां पवित्रं यो मंगळानां च मंगळम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ।। १६
यत स्सर्वाणि भूतानि भवंत्यादि युगागमे ।
यस्मिंश्च प्रळयं यांति पुनरेव युगक्षये ।। १७
तस्य लोक प्रधानस्य जगन्नाथस्य भूपते ।
विष्णो र्नामसहस्रं मे शृणु पापभयापहम् ।। १८
यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ।। १९
विष्णो र्नामसहस्रस्य वेदव्यासो महा नृषिः ।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ।। २०
अमृतां शूद्भवो बीजं शक्ति र्देवकि नंदनः ।
त्रिसामा हृदयं तस्य शांत्यर्थे विनियुज्यते ।। २१
विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूप दैत्यांतं नमामि पुरुषोत्तमम् ।। २२

अस्य श्रीविष्णोः दिव्य सहस्रनाम स्तोत्र महामंत्रस्य, श्री वेद व्यासो भगवान् ऋषिः, अनुष्टुप् छन्धः, श्री महाविष्णुः परमात्मा श्रीमन्नारायणो देवता, अमृतांशूद्भवो भानुरिति बीजं, देवकी नंदन स्स्रष्टेति शक्तिः, उद्भवः क्षोभणो देव इति परमो मंत्रः, शंखभृन्नन्दकी चक्रीति कीलकं, शार्ङ्गधन्वा गदाधर इत्यस्त्रं, रथांगपाणि रक्षोभ्य इति नेत्रं, त्रिसामा सामग स्सामेति कवचं, आनंदं परब्रह्मेति योनिः, ऋतुस्सुदर्शनः काल इति दिग्बंधः, श्री विश्वरूप इति ध्यानम्, श्री महाविष्णु कैंकर्यरूपे श्री सहस्रनाम जपे विनियोगः. २३

**ध्यानम्**

क्षीरोदन्वत् प्रदेशे शुचिमणि विलसत् सैकते मौक्तिकानां
मालाक्ल्प्तासनस्थः स्फटिकमणि निभैः मौक्तिकैः मण्डिताङ्गः ।
शुभ्रै रभ्रै रदभ्रै रुपरि विरचितै र्मुक्तपीयूषवर्षैः
आनंदी नः पुनीयात्, अरिनळिन गदा शंखपाणि र्मुकुंदः ।। २४
भूः पादौ यस्यनाभिः वियदसु रनिलः चंद्रसूर्यौच नेत्रे ।
कर्णावाशा श्शिरोद्यौः मुखमपि दहनो यस्य वास्तेय मब्धिः ।।
अंतरस्थं यस्य विश्वं सुरनर खगगो भोगि गंधर्व दैत्यैः ।
चित्रं रंरम्यते, तं त्रिभुवनवपुषं विष्णु मीशं नमामि।। २५
शांताकारं भुजगशयनं पद्मनाभं सुरेशं ।
विश्वाकारं गगन सदृशं मेघवर्णं शुभांगम् ।।

लक्ष्मीकान्तं कमलनयनं योगिहृ द्ध्यानगम्यं ।
वंदे विष्णुं भवभयहरं सर्वलोकैक नाथम्।। २६
मेघश्यामं पीतकौशेयवासं श्रीवत्सांकं कौस्तुभोद्भासितांगम्।
पुण्योपेतं पुंडरीकायताक्षं विष्णुं वन्दे सर्वलोकैक नाथम्।।२७
सशंखचक्रं सकिरीटकुंडलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्थ्सलशोभि कौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम्।।२८

विश्वं विष्णु र्वषट्कारो भूत भव्य भवत् प्रभुः ।
भूतकृत् भूतभृ द्भावो भूतात्मा भूतभावनः ।। १
पूतात्मा परमात्मा च मुक्तानां परमागतिः ।
अव्ययः पुरुष स्साक्षी क्षेत्रज्ञोऽक्षर एव च ।। २
योगो योगविदां नेता प्रधान पुरुषेश्वरः ।
नारसिंहवपु श्श्रीमान् केशवः पुरुषोत्तमः ।। ३
सर्व श्शर्व श्शिव स्थ्साणुः भूतादि र्निधि रव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभु रीश्वरः ।। ४
स्वयंभू श्शंभु रादित्यः पुष्क राक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातु रुत्तमः ।। ५
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ।। ६
अग्राह्य श्शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूत स्त्रिककुद्धाम पवित्रं मंगळं परम् ।। ७
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ।। ८
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृति रात्मवान् ।। ९
सुरेश श्शरणं शर्म विश्वरेताः प्रजाभवः ।
अह स्संवत्सरो व्याळः प्रत्यय स्सर्वदर्शनः ।। १०
अज स्सर्वेश्वर स्सिद्धः सिद्धि स्सर्वादि रच्युतः ।
वृषाकपि रमेयात्मा सर्वयोग विनिस्सृतः ।। ११
वसु र्वसुमना स्सत्यः समात्मा सम्मित स्समः ।
अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ।। १२
रुद्रो बहुशिरा बभ्रुः विश्वयोनि श्शुचिश्रवाः ।
अमृत श्शाश्वतः स्थाणुः वरारोहो महातपाः ।। १३

सर्वग स्सर्ववि द्भानुः विष्वक्सेनो जनार्दनः ।
वेदो वेदवि दव्यंगो वेदांगो वेदवित् कविः ।। १४
लोकाध्यक्ष स्सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहः चतुर्दंष्ट्र श्चतुर्भुजः ।। १५
भ्राजिष्णु र्भोजनं भोक्ता सहिष्णु र्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ।। १६
उपेंद्रो वामनः प्रांशुः अमोघ श्शुचि रूर्जितः ।
अतींद्र स्संग्रह स्सर्गो धृतात्मा नियमो यमः ।। १७
वेद्यो वैद्य स्सदायोगी वीरहा माधवो मधुः ।
अतींद्रियो महामायो महोत्साहो महाबलः ।। १८
महाबुद्धि र्महावीर्यो महाशक्ति र्महाद्युतिः ।
अनिर्देश्यवपु श्श्रीमान् अमेयात्मा महाद्रिधृत् ।। १९
महेष्वासो महीभर्ता श्रीनिवास स्सतांगतिः ।
अनिरुद्ध स्सुरानंदोगोविंदो गोविदां पतिः ।। २०
मरीचि र्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभ स्सुतपाः पद्मनाभः प्रजापतिः ।। २१
अमृत्यु स्सर्वदृक् सिंहः संधाता संधितमान् स्थिरः ।
अजो दुर्मर्षण श्शास्ता विश्रुतात्मा सुरारिहा ।। २२
गुरु र्गुरुतमो धाम सत्य स्सत्य पराक्रमः ।
निमिषोऽनिमिष स्स्रग्वी वाचस्पति रुदारधीः ।। २३
अग्रणी र्ग्रामणी श्श्रीमान् न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्ष स्सहस्रपात् ।। २४
आवर्तनो निवृत्तात्मा संवृत स्संप्रमर्दनः ।
अह स्संवर्तको वह्निः अनिलो धरणीधरः ।। २५
सुप्रसादः प्रसन्नात्मा विश्व सृड् विश्वभुग् विभुः ।
सत्कर्ता सत्कृत स्साधुः जह्नु र्नारायणो नरः ।। २६
असंख्येयोऽप्रमेयात्मा विशिष्ट श्शिष्टकृ च्छुचिः।
सिद्धार्धः सिद्धसंकल्पः सिद्धिद स्सिद्धसाधनः ।। २७
वृषाही वृषभो विष्णुः वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्त श्श्रुतिसागरः ।। २८
सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ।। २९
ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ।

ऋद्ध स्स्पष्टाक्षरो मंत्रः चंद्रांशु र्भास्करद्युतिः ।। ३०
अमृतांशूद्भवो भानुः शशबिंदु स्सुरेश्वरः ।
औषधं जगत स्सेतुः सत्यधर्म पराक्रमः ।। ३१
भूतभव्य भवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ।। ३२
युगादिकृ द्युगावर्तो नैकमायो महाशनः ।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ।। ३३
इष्टो विशिष्ट श्शिष्टेष्टः शिखंडी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहु र्महीधरः ।। ३४
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधि रधिष्ठानं अप्रमत्तः प्रतिष्ठितः ।। ३५
स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुः आदिदेवः पुरन्दरः ।। ३६
अशोक स्तारण स्तारः शूर श्शौरि र्जनेश्वरः ।
अनुकूल श्शतावर्तः पद्मी पद्म निभेक्षणः ।। ३७
पद्मनाभोऽरविंदाक्षः पद्मगर्भ श्शरीरभृत् ।
महर्धि ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ।। ३८
अतुल श्शरभो भीमः समयज्ञो हविर्हरिः ।
सर्व लक्षण लक्षण्यो लक्ष्मीवान् समितिंजयः ।। ३९
विक्षरो रोहितो मार्गो हेतु र्दामोदर स्सहः ।
महीधरो महाभागो वेगवा नमिताशनः ।। ४०
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ।। ४१
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।
परर्धिः परमस्पष्टः तुष्टः पुष्ट श्शुभेक्षणः ।। ४२
रामो विरामो विरजोमार्गो नेयो नयो नयः ।
वीर श्शक्तिमतां श्रेष्ठो धर्मो धर्मवि दुत्तमः ।। ४३
वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भ श्शत्रुघ्नो व्याप्तो वायु रधोक्षजः ।। ४४
ऋतु स्सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्र स्संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ।। ४५
विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ।। ४६

अनिर्विण्ण स्थ्सविष्ठो भूः धर्मयूपो महामखः ।
नक्षत्रनेमि र्नक्षत्री क्षमः क्षाम स्समीहनः ।। ४७
यज्ञ इज्यो महेज्यश्च क्रतु स्सत्रं सतांगतिः ।
सर्वदर्शी निवृत्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ।। ४८
सुव्रत स्सुमुख स्सूक्ष्मः सुघोष स्सुखद स्सुहृत् ।
मनोहरो जितक्रोधो वीरबाहु र्विदारणः ।। ४९
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ।। ५०
धर्मगुप् धर्मकृत्धर्मी सदक्षर मसत् क्षरम् ।
अविज्ञाता सहस्रांशुः विधाता कृतलक्षणः ।। ५१
गभस्तिनेमि स्सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृत् गुरुः ।। ५२
उत्तरो गोपति र्गोप्ता ज्ञानगम्यः पुरातनः
शरीरभूतभृ द्भोक्ता कपींद्रो भूरिदक्षिणः ।। ५३
सोमपोऽमृतप स्सोमः पुरुजित् पुरुसत्तमः ।
विनयो जय स्सत्यसंधो दाशार्ह स्सात्वतांपतिः ।। ५४
जीवो विनयिता साक्षी मुकुंदोऽमित विक्रमः
अंभोनिधि रनंतात्मा महोदधिशयोऽंतकः ।। ५५
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ।। ५६
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपद स्त्रिदशाध्यक्षः महाशृंगः कृतांतकृत् ।। ५७
महावराहो गोविंदः सुषेणः कनकांगदी।
गुह्यो गभीरो गहनो गुप्त श्चक्र गदाधरः ।। ५८
वेधाः स्वांगोऽजितः कृष्णो दृढ स्संकर्षणो ऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ।। ५९
भगवान् भगहा नंदी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णु र्गतिसत्तमः ।। ६०
सुधन्वा खंडपरशुः दारुणो द्रविणप्रदः ।
दिविस्पृक् सर्व दृक् व्यासो वाचस्पति रयोनिजः ।। ६१
त्रिसामा सामगस्साम निर्वाणं भेषजं भिषक् ।
सन्न्यासकृ च्छम श्शांतो निष्ठाशांतिः परायणः।। ६२
शुभांग श्शांतिद स्स्रष्टा कुमुदः कुवलेशयः ।

गोहितो गोपति र्गोप्ता वृषभाक्षो वृषप्रियः ।। ६३
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृ च्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ।। ६४
श्रीद श्श्रीशः श्रीनिवासः श्रीनिधि श्श्रीविभावनः ।
श्रीधर श्श्रीकर श्श्रेयः श्रीमान् लोकत्रयाश्रयः ।। ६५
स्वक्ष स्स्वंग श्शतानंदो नंदि र्ज्योति र्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीरि ्तश्छिन्न संशयः।। ६६
उदीर्ण स्सर्वतश्चक्षुः अनीश श्शाश्वतः स्थिरः ।
भूशयो भूषणो भूतिः विशोक श्शोकनाशनः ।। ६७
अर्चिष्मा नर्चितः कुंभो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ।। ६८
कालनेमि निहाशौरिः शूर श्शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ।। ६९
कामदेवः कामपालः कामी कांतः कृतागमः ।
अनिर्देश्यवपु र्विष्णुः वीरोऽनंतो धनंजयः ।। ७०
ब्रह्मण्यो ब्रह्मकृत् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ।।७१
महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतु र्महायज्वा महायज्ञो महाहविः ।। ७२
स्तव्य स्त्सवप्रिय स्त्सोत्रं स्तुत स्त्सोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्ति रनामयः ।। ७३
मनोजव स्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसु र्वसुमना हविः ।। ७४
सद्गति स्सत्कृति स्सत्ता सद्भूति स्सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवास स्सुयामुनः ।। ७५
भूतावासो वासुदेवः सर्वासु निलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽ थापराजितः ।। ७६
विश्वमूर्ति र्महामूर्तिः दीप्तमूर्ति रमूर्तिमान् ।
अनेकमूर्ति रव्यक्तः शतमूर्ति श्शताननः ।। ७७
एको नैक स्स वः कः किं यत्तत्पद मनुत्तमम्।
लोकबंधु र्लोकनाथो माधवो भक्तवत्सलः ।। ७८
सुवर्ण वर्णो हेमांगो वरांग श्चंदनांगदी ।
वीरहा विषम श्शून्यो घृताशी रचल श्चलः ।। ७९

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ।। ८०
तेजो वृषो द्युतिधरः सर्वशस्त्र भृतां वरः ।
पग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः ।। ८१
चतुर्मूर्ति श्चतुर्बाहुः चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावः चतुर्वेदवि देकपात् ।। ८२
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ।। ८३
शुभांगो लोकसारंगः सुतन्तु स्तन्तुवर्धनः ।
इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ।। ८४
उद्भव स्सुंदर स्सुंदो रत्ननाभ स्सुलोचनः ।
अर्को वाजसनि श्शृंगी जयंतः सर्वविज्जयी ।। ८५
सुवर्ण बिंदु रक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्लदो महागर्तो महाभूतो महानिधिः ।। ८६
कुमुदः कुन्दरः कुंदः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ।। ८७
सुलभ स्सुव्रत स्सिद्धः शत्रुजि च्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थः चाणूरांध्र निषूदनः ।। ८८
सहस्रार्चि स्सप्तजिह्वः सप्तैधा स्सप्तवाहनः ।
अमूर्ति रनघोऽचिंत्यो भयकृत् भयनाशनः ।। ८९
अणुर् बृहत् कृशः स्थूलो गुणभृ न्निर्गुणो महान् ।
अधृत स्स्वधृत स्स्वास्थ्यः प्राग्वंशो वंश वर्धनः ।। ९०
भारभृत् कथितो योगी योगीश स्सर्व कामदः ।
आश्रम श्श्रमणः क्षामः सुपर्णो वायु वाहनः ।। ९१
धनुर्धरो धनुर्वेदो दंडो दमयिताऽदमः ।
अपराजित स्सर्वसहो नियंता नियमो यमः ।। ९२
सत्त्ववान् सात्विक स्सत्यः सत्यधर्म परायणः ।
अभिप्रायः प्रियार्होर्हः प्रियकृत् प्रीतिवर्धनः ।। ९३
विहायसगति र्ज्योतिः सुरुचि र्हुतभु ग्विभुः ।
रवि र्विरोचन स्सूर्यः सविता रवि लोचनः ।। ९४
अनंत हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः ।
अनिर्विण्ण स्सदामर्षी लोकाधिष्ठान मद्भुतः ।। ९५
सनात् सनातनतमः कपिलः कपि रव्ययः ।

स्वस्तिद स्स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ।। ९६
अरौद्रः कुंडली चक्री विक्रम्यूर्जित शासनः ।
शब्दातिग श्शब्दसहः शिशिर श्शर्वरीकरः ।। ९७
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवण कीर्तनः ।। ९८
उत्तारणो दुष्कृतिहा पुण्यो दुस्स्वप्न नाशनः ।
वीरहा रक्षण स्संतो जीवनः पर्यवस्थितः ।। ९९
अनंत रूपोऽनंतश्रीः जितमन्यु र्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ।। १००
अनादि र्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ।
जननो जन जन्मादिः भीमो भीमपराक्रमः ।। १०१
आधार निलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वग स्सत्पथाचारः प्राणदः प्रणवः पणः ।। १०२
प्रमाणं प्राणनिलयः प्राणधृत् प्राण जीवनः ।
तत्त्वं तत्त्ववि देकात्मा जन्ममृत्यु जरातिगः ।। १०३
भूर्भुव स्स्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपति र्यज्वा यज्ञांगो यज्ञवाहनः ।। १०४
यज्ञभृत् यज्ञकृत् यज्ञी यज्ञभुक् यज्ञसाधनः ।
यज्ञांतकृत् यज्ञ गुह्यं अन्न मन्नाद एवच ।। १०५
आत्मयोनि स्स्वयं जातो वैखान स्सामगायनः ।
देवकी नंदन स्स्रष्टा क्षितीशः पापनाशनः ।। १०६
शंखभृत् नंदकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथांगपाणि रक्षोभ्यः सर्व प्रहरणायुधः ।। १०७
श्री सर्वप्रहरणायुध ओं नम इति
वनमाली गदी शार्ङ्गी शंखी चक्री च नंदकी ।
श्रीमान्नारायणो विष्णुः वासुदेवोऽभिरक्षतु ।। १०८

इतीदं कीर्तनीयस्य केशवस्य महात्मनः
नाम्नां सहस्त्रं दिव्यानां अशेषेण प्रकीर्तितम् ।। १
य इदं शृणुयात् नित्यं यश्चापि परिकीर्तयेत्
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः ।। २
वेदांतगो ब्राह्मण स्स्यात् क्षत्रियो विजयी भवेत्
वैश्यो धनसमृद्ध स्स्यात् शूद्र स्सुख मवाप्नुयात् ।। ३

धर्मार्थी प्राप्नुया द्धर्मं अर्थार्थी चार्थ माप्नुयात्
कामा नवाप्नुयात् कामी प्रजार्थी चाप्नुयात् प्रजाः ।। ४
भक्तिमान् यस्सदोत्थाय शुचि स्तद्गत मानसः ।
सहस्रं वासुदेवस्य नाम्ना मेतत् प्रकीर्तयेत्।। ५
यशः प्राप्नोति विपुलं याति प्राधान्य मेव च ।
अचलां श्रिय माप्नोति श्रेयः प्राप्नो त्यनुत्तमम् ।। ६
न भयं क्वचि दाप्नोति वीर्यं तेजश्च विंदति ।
भव त्यरोगो द्युतिमान् बलरूप गुणान्वितः ।। ७
रोगार्तो मुच्यते रोगात् बद्धो मुच्येत बंधनात् ।
भया न्मुच्येत भीतस्तु मुच्ये दापन्न आपदः ।। ८
दुर्गा ण्यतितर त्याशु पुरुषः पुरुषोत्तमम् ।
स्तुव न्नामसहस्रेण नित्यं भक्ति समन्वितः ।। ९
वासुदेवाश्रयो मर्त्यो वासुदेव परायणः ।
सर्वपाप विशुद्धात्मा याति ब्रह्म सनातनम् ।। १०
न वासुदेव भक्तानां अशुभं विद्यते क्वचित् ।
जन्म मृत्यु जरा व्याधि भयं नैवो पजायते ।। ११
इमं स्तव मधीयानः श्रद्धाभक्ति समन्वितः ।
युज्येतात्म सुखक्षांति श्रीधृति स्मृति कीर्तिभिः ।। १२
न क्रोधो न च मात्सर्यं न लोभो नाऽशुभा मतिः ।
भवंति कृत पुण्यानां भक्तानां पुरुषोत्तमे ।। १३
द्यौ स्सचंद्रार्क नक्षत्रं खं दिशो भू र्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ।। १४
ससुरासुर गंधर्वं सयक्षोरग राक्षसम् ।
जगद्वशे वर्त तेदं कृष्णस्य सचराचरम् ।। १५
इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मका न्याहुः क्षेत्रं क्षेत्रज्ञ एव च ।। १६
सर्वागमाना माचारः प्रथमं परिकल्पितः ।
आचार प्रभवो धर्मो धर्मस्य प्रभु रच्युतः ।। १७
ऋषयः पितरो देवाः महाभूतानि धातवः ।
जंगमा जंगमं चेदं जगन्नारायणोद्भवम् ।। १८
योगो ज्ञानं तथा सांख्यं विद्या श्शिल्पादि कर्म च ।
वेदा श्शास्त्राणि विज्ञानं एतत्सर्वं जनार्दनात् ।। १९
एको विष्णु र्महद्भूतं पृथग्भूता न्यनेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा भुंक्ते विश्वभु गव्ययः ।। २०

इमं स्तवं भगवतो विष्णो र्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च ।। २१
विश्वेश्वर मजं देवं जगतः प्रभु मव्ययम् ।
भजंति ये पुष्कराक्षं न ते यांति पराभवम् ।। २२
न ते यांति पराभवम् ओम् नम इति ।
अर्जुन उवाच
पद्मपत्र! विशालाक्ष! पद्मनाभ! सुरोत्तम! ।
भक्ताना मनुरक्तानां त्राता भव जनार्दन! ।। २३
श्री भगवानुवाच
यो मां नाम सहस्रेण स्तोतु मिच्छति पांडव ! ।
सोऽह मेकेन श्लोकेन स्तुत एव न संशयः ।। २४
स्तुत एव न संशय ओम् नम इति
व्यास उवाच
वासनात् वासुदेवस्य वासितं ते जगत्त्रयम् ।
सर्वभूत निवासोऽसि वासुदेव नमोऽस्तु ते ।। २५
श्री वासुदेव नमोस्तुत ओम् नम इति
पार्वत्युवाच
केनोपायेन लघुना विष्णोर्नाम सहस्रकम् ।
पठ्यते पंडितै र्नित्यं श्रोतु मिच्छा म्यहं प्रभो ।। २६
ईश्वर उवाच
श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ! ।।
श्री रामनाम वरानन ओम् नम इति
ब्रह्मोवाच
नमोऽस्त्वनंताय सहस्रमूर्तये
सहस्रपादाक्षि शिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ।। २८
श्री सहस्रकोटी युगधारिण ओम् नम इति
संजय उवाच
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीः विजयो भूतिः ध्रुवा नीति र्मति र्मम ।। २९
श्री भगवानुवाच

अनन्या श्चिंतयंतो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।। ३०
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म संस्थापनार्थाय संभवामि युगे युगे ।। ३१
आर्ता विषण्णा श्शिथिलाश्च भीताः घोरेषु च व्याधिषु वर्तमानाः।
संकीर्त्य नारायण शब्दमात्रं विमुक्तदुःखा स्सुखिनो भवंति ।।३२
यदक्षर पदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव! नारायण! नमोऽस्तु ते ।। ३३
कायेन वाचा मनसेंद्रियैर्वा
बुद्ध्या त्मना वा प्रकृते स्स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि ।। ३४

इति श्री महाभारते शतसहस्रिकायां संहितायां
वैयासिक्याम् आनुशासनिकपर्वणि मोक्षधर्मे श्री भीष्म
युधिष्ठिर संवादे श्री विष्णोः दिव्यसहस्रनाम स्तोत्रं नाम चतुः पंचाश दधिक द्विशत
तमोऽध्यायः।।
श्रीमन्नारायणायेति समर्पयामि
ओम् तत् सत्
सर्वं श्री कृष्णार्पणमस्तु

## मुकुन्दमाला

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने ।
तमहं शिरसा वन्दे राजानं कुलशेखरम् ।।
श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठन कोविदेति।
नाथेति नागशयनेति जगन्निवासेति
आलापिनं प्रतिपदं कुरु मां मुकुन्द ! ।। १
जयतु जयतु देवो देवकीनंदनोऽयं
जयतु जयतु कृष्णो वृष्णिवंश प्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ।। २

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्त मेकान्त मियन्त मर्थम् ।
अविस्मृति स्त्व च्चरणारविन्दे
भवे भवे मेऽस्तु भवत् प्रसादात् ।। ३
नाहं वन्दे तव चरणयोः द्वन्द्व मद्वन्द्वहेतोः
कुम्भीपाकं गुरु मपि हरे! नारकं नापनेतुम् ।
रम्या रामा मृदुतनुलता नन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तम् ।। ४
नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्य द्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम् ।
एतत् प्राथ्यं मम बहुमतं जन्म जन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्ति रस्तु ।। ५
दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक! प्रकामम् ।
अवधीरित शारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयानि ।। ६
कृष्ण! त्वदीय पदपङ्कज पञ्जरान्तः
अद्यैव मे विशतु मानस राजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ।। ७
चिन्तयामि हरिमेव सन्ततं
मन्दमन्द हसिताननाम्बुजम् ।
नन्दगोप तनयं परात्परं
नारदादि मुनिबृन्द वन्दितम् ।। ८
करचरणसरोजे कान्तिमन्नेत्रमीने
श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे ।
हरिसरसि विगाह्यापीय तेजोजलौघं
भवमरुपरिखिन्नः खेदमद्यत्यजामि ।। ९
सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरम स्वचित्त! रन्तुम् ।
सुखतर मपरं न जातु जाने
हरिचरण स्मरणामृतेन तुल्यम् ।। १०
माभी र्मन्दमनो! विचिन्त्य बहुधा यामी श्चिरं यातनाः

नामी नः प्रभवन्ति पापरिपव स्स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ।। ११
भवजलधि गतानां द्वन्द्व वाताहतानां
सुत दुहितृ कळत्र त्राणभारार्दितानाम् ।
विषम विषयतोये मज्जता मप्लवानां
भवतु शरण मेको विष्णुपोतो नराणाम् ।। १२
भवजलधि मगाधं दुस्तरं निस्तरेयं
कथ मह मिति चेतो! मास्मगाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्ति रेका
नरकभिदि निषण्णा तारयिष्य त्यवश्यम् ।। १३
तृष्णातोये मदनपवनोद्धूत मोहोर्मिमाले
दाराऽवर्ते तनय सहजग्राह संघाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ।। १४
माद्राक्षं क्षीणपुण्यान्, क्षणमपि भवतो भक्तिहीनान् पदाब्जे
माश्रौषं श्राव्यबन्धं तव चरित मपास्यान्यदाख्यान जातम्।
मास्मार्षं माधव ! त्वामपि भुवनपते! चेतसाऽपह्नुवानान्
माभूवं त्वत् सपर्याव्यतिकररहितो जन्म जन्मान्तरेऽपि।। १५
जिह्वे! कीर्तय केशवं, मुररिपुं चेतो! भज, श्रीधरं ऽ
पाणिद्वन्द्व! समर्चया, ऽच्युतकथाः श्रोत्रद्वय! त्वं शृणु।
कृष्णं लोकय लोचनद्वय! हरे र्गच्छाङ्घ्रियुग्माऽलयं
जिघ्र घ्राण! मुकुन्दपादतुलसीं, मूर्धन्! नमाधोक्षजम् ।। १६
हे लोका श्शृणुत प्रसूतिमरणव्याधे श्चिकित्सा मिमां
योगज्ञा स्समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः।
अन्तर्ज्योति रमेय मेक ममृतं कृष्णाख्य मापीयतां
तत्पीतं परमौषधं वितनुते निर्वाण मात्यन्तिकम् ।। १७
हे मर्त्याः! परमं हितं शृणुत वो वक्ष्यामि संक्षेपतः
संसारार्णव मापदूर्मिबहुळं सम्यक् प्रविश्य स्थिताः ।
नानाज्ञान मपास्य चेतसि नमो नारायणाये त्यमुं
मन्त्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ।। १८
पृथ्वी रेणु, रणुः पयांसि कणिकाः, फल्गु स्स्फुलिङ्गो लघुः
तेजो, निश्वसनं मरुत् तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।

क्षुद्रा रुद्र पितामहप्रभृतयः कीटा स्समस्ता स्सुराः
दृष्टे यत्र स तावको विजयते भूमाऽवधूतावधिः ।। १९
बद्धेनाञ्जलिना नतेन शिरसा गात्रै स्सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयने नोद्गीर्णबाष्पाम्बुना ।
नित्यं त्वच्चरणारविंदयुगळ ध्यानामृता स्वादिनां
अस्माकं सरसीरुहाक्ष! सततं सम्पद्यतां जीवितम् ।। २०
हे गोपालक! हे कृपाजलनिधे! हे सिन्धुकन्यापते!
हे कंसान्तक! हे गजेन्द्र करुणापारीण! हे माधव ! ।
हे रामानुज! हे जगत्त्रयगुरो! हे पुण्डरीकाक्ष ! मां
हे गोपीजननाथ! पालय परं जानामि न त्वां विना ।। २१
भक्तापाय भुजङ्ग गारुडमणिः त्रैलोक्यरक्षामणिः,
गोपीलोचन चातकाम्बुद मणि स्सौन्दर्यमुद्रामणिः ।
यः कान्तामणि रुक्मिणीघनकुच द्वन्द्वैकभूषामणिः
श्रेयो देव शिखामणि र्दिशतु नो गोपालचूडामणिः ।। २२
शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्य सम्पूज्यमन्त्रं
संसारोत्तारमन्त्रं समुपचित तमस्सङ्घ निर्याणमन्त्रम् ।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजग सन्दष्ट सन्त्राणमन्त्रं
जिह्वे! श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ।। २३
व्यामोहप्रशमौषधं मुनिमनोवृत्ति प्रवृत्त्यौषधं
दैत्येन्द्रार्तिकरौषधं त्रिभुवनी सञ्जीवनै कौषधम् ।
भक्तात्यन्त हितौषधं भवभय प्रध्वंसनैकौषधं
श्रेयः प्राप्तिकरौषधं पिब मन श्श्रीकृष्णदिव्यौषधम् ।। २४
आम्नायाभ्यसना न्यरण्यरुदितं वेदव्रता न्यन्वहं
मेद श्छेद फलानि पूर्तविधय स्सर्वे हुतं भस्मनि ।
तीर्थाना मवगाहनानि च गजस्नानं, विना यत्पद ऽ
द्वन्द्वाम्भोरुह संस्मृती र्विजयते देव स्सनारायणः।। २५
श्रीमन् नाम प्रोच्य नारायणाख्यं
के न प्रापु र्वाञ्छितं पापिनोऽपि ।
हा! नः पूर्वं वाक् प्रवृत्ता न तस्मिन्
तेन प्राप्तं गर्भवासादिदुःखम् ।। २६
मज्जन्मनः फलमिदं मधुकौटभारे !
मत् प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्य भृत्य परिचारक भृत्य भृत्य
भृत्यस्य भृत्य इति मां स्मर! लोकनाथ! ।। २७

नाथे नः पुरुषोत्तमे, त्रिजगता मेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कंचित् पुरुषाधमं कतिपय ग्रामेश मल्पार्थदं
सेवायै मृगयामहे नर महो! मूका वराका वयम्।। २८
मदन! परिहर स्थितिं मदीये
मनसि, मुकुन्द पदारविन्द धाम्नि ।
हरनयन कृशानुना कृशोऽसि
स्मरसि न चक्रपराक्रमं मुरारेः ।। २९
तत्त्वं ब्रुवाणानि परं परस्मात्
मधु क्षरन्तीव सतां फलानि ।
प्रावर्तय प्राञ्जलिरस्मि जिह्वे!
नामानि नारायण गोचराणि ।। ३०
इदं शरीरं परिणाम पेशलं
पत त्यवश्यं श्लथसंधि जर्झरम् ।
कि मौषधैः क्लिश्यसि मूढ दुर्मते !
निरामयं कृष्णरसायनं पिब ।। ३१
दारा वाराकरवरसुता ते, तनूजो विरिञ्चिः
स्तोता वेद स्तव, सुरगणो भृत्यवर्गः, प्रसादः ।
मुक्ति, र्माया जग दविकलं, तावकी देवकी ते
माता, मित्रं बलरिपुसुत, स्त्वय्यतोऽन्यं न जाने ।। ३२
कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णे नामर शत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णा देव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति सर्व मेत दखिलं हे कृष्ण! संरक्ष माम् ।। ३३
तत्त्वं प्रसीद भगवन्! कुरु मय्यनाथे
विष्णो! कृपां परमकारुणिकः किल त्वम् ।
संसार सागरनिमग्न मनन्तदीनं
उद्धर्तु मर्हसि हरे! पुरुषोत्तमोऽऽसि ।। ३४
नमामि नारायणपादपङ्कजं
करोमि नारायणपूजनं सदा ।
वदामि नारायणनामनिर्मलं
स्मरामि नारायणतत्त्व मव्ययम् ।। ३५
श्रीनाथ! नारायण! वासुदेव!

श्रीकृष्ण! भक्तप्रिय! चक्रपाणे! ।
श्रीपद्मनाभाऽच्युत! कैटभारे!
श्रीराम! पद्माक्ष! हरे! मुरारे!
अनन्त! वैकुण्ठ! मुकुन्द! कृष्ण!
गोविन्द! दामोदर! माधवेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चित्
अहो! जनानां व्यसनाभिमुख्यम् ।। ३७
ध्यायन्ति ये विष्णु मनन्त मव्ययं
हृत्पद्ममध्ये सततं व्यवस्थितम् ।
समाहितानां सतताभयप्रदं
ते यान्ति सिद्धिं परमाञ्च वैष्णवीम् ।। ३८
क्षीरसागरतरङ्ग शीकरासार तारकित चारुमूर्तये ।
भोगिभोग शयनीयशायिने माधवाय मधुविद्विषे नमः ।।३९
यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ
मित्रे द्विजन्म वरपद्म शरावभूताम् ।
तेनाम्बुजाक्ष चरणाम्बुज षट्पदेन
राज्ञा कृता कृति रियं कुलशेखरेण ।। ४०

मुकुन्दमाला संपूर्णा

श्रीमते रामानुजाय नमः
श्रीरामचंद्र परब्रह्मणे नमः

# संक्षेप रामायणम्

**प्रार्थन**

श्रीमद्रामायण पारायणारम्भे पठनीयाः श्लोकाः
प्रथमतः स्वस्व संप्रदाय निर्वाहक आचार्यानुसन्धानम्
मणवाळमहामुनुल तनियन्
श्रीशैलेश दयापात्रं धीभक्त्यादि गुणार्णवम् ।
यतीन्द्र प्रवणं वन्दे रम्यजामातरं मुनिम्।। १
गुरुपरंपर संग्रह तनियन्
लक्ष्मीनाथ समारम्भां नाथयामुन मध्यमाम्।
अस्मदाचार्य पर्यन्तां वन्दे गुरुपरंपराम्।। २

श्रीभाष्यकारतनियन्
यो नित्य मच्युतपदाम्बुज युग्मरुक्म
व्यामोहत स्तदितराणि तृणाय मेने।
अस्मद्गुरो भगवतोऽस्य दयैक सिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये।। ३
श्रीशठकोपुल तनियन्
माता पिता युवतय स्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम्।
आद्यस्य नः कुलपतेः वकुलाभिरामं
श्रीमत्तदंघ्रियुगळं प्रणमामि मूर्ध्ना।। ४
आळ्वारुल तनियन्
भूतं सरश्च महदाह्वय भट्टनाथ
श्रीभक्तिसार कुलशेखर योगिवाहान्।
भक्तांघ्रिरेणु परकाल यतीन्द्र मिश्रान्
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम्।। ५
अथश्रीशैलपूर्ण विषयः
पितामहस्यापि पितामहाय प्राचेतसादेश फलप्रदाय।
श्रीभाष्यकारोत्तमदेशिकाय श्रीशैलपूर्णाय नमो नमः स्तात्।।६
विष्णु ध्यानम्
शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।। ७
विष्वक्सेन ध्यानम्
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम्।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये।। ८
श्री हयग्रीव ध्यानम्
ज्ञानानंदमयं देवं निर्मल स्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीव मुपास्महे।। ९
अभङ्गुर कलादान स्थूललक्ष्यत्व मीयुषे।
तुङ्गाय महसे तस्मै तुरङ्गाय मुखे नमः।। १०
वाल्मीकि ध्यानम्
कूजन्तं राम रामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकि कोकिलम्।। ११
वाल्मीके मुनि सिंहस्य कविता वनचारिणः।
शृण्वन् रामकथानादं को न याति परां गतिम्।। १२

यः पिबन् सततं राम चरितामृत सागरम्।
अतृप्तस्तं मुनिं वन्दे प्राचेतस मकल्मषम्।। १३

आंजनेय प्रार्थन

गोष्पदीकृत वाराशिं मशकीकृत राक्षसम्।
रामायण महामाला रत्नं वन्देऽनिलात्मजम्।। १४
अञ्जनानन्दनं वीरं जानकी शोकनाशनम्।
कपीश मक्षहन्तारं वन्दे लङ्काभयङ्करम्।। १५
आमिषीकृत मार्ताण्डं गोष्पदीकृत सागरम्।
तृणीकृत दशग्रीवं आञ्जनेयं नमाम्यहम्।। १६
मनोजवं मारुततुल्य वेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि।। १७
उल्लङ्घ्य सिन्धोस्सलिलं सलीलं
यश्शोकवह्निं जनकात्मजायाः।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलि राञ्जनेयम्।। १८
आञ्जनेय मतिपाटलाननं काञ्चनाद्रि कमनीयविग्रहम्।
पारिजात तरुमूलवासिनं भावयामि पवमान नन्दनम्।।१९
यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम्।
बाष्पवारि परिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम्।।२०

श्री रामायण महिम

वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसा दासीत् साक्षाद्रामायणात्मना।। २१
चरितं रघुनाथस्य शतकोटि प्रविस्तरम्।
एकैक मक्षरं प्रोक्तं महापातक नाशनम्।। २२
शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा।। २३
वाल्मीकिगिरि संभूता रामसागर गामिनी।
पुनाति भुवनं पुण्या रामायण महानदी।। २४
श्लोकसारजलाकीर्णं सर्गकल्लोल सङ्कु लम्।
काण्डग्राह महामीनं वन्दे रामायणार्णवम्।। २५

यः कर्णाञ्जलि संपुटै रहरहः सम्यक् पिबत्यादरात्
वाल्मीकेर्वदनारविन्दगळितं रामायणाख्यं मधु।
जन्मव्याधिजराविपत्तिमरणैः अत्यंतसोपद्रवं
संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम्।।२६
तदुपगतसमाससन्धियोगं सममधुरोपनतार्थ वाक्यबद्धम्।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशाम यध्वम्।।२७
श्रीराम प्रार्थना
श्रीराघवं दशरथात्मज मप्रमेयं
सीतापतिं रघुकुलान्वय रत्नदीपम्।
आजानुबाहु मरविन्द दळाय ताक्षं
रामं निशाचर विनाशकरं नमामि।। २८
वैदेहीसहितं सुर द्रुमतले हैमे महामण्डपे
मध्ये पुष्पक मासने मणिमये वीरासने सुस्थितम्।
अग्रे वाचयति प्रभंजनसुते तत्त्वं मुनिभ्यःपरं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम्।। २९
ततो यथाशक्ति श्रीकोशोपरि
भगवदाराधनं कार्यम्
धर्मात्मा सत्यसन्धश्च रामो दाशरथि र्यदि।
पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम्।। ३०
तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकि र्मुनिपुङ्गवम्।। ३१
इति श्लोकद्वयं पठित्वा
श्री रघुनन्दन परब्रह्मणे नमः
इत्युक्त्वा पारायण मारभेत

श्रीसीतारामचंद्रपरब्रह्मणे नमः

# संक्षेप रामायणम्

तपस्स्वाध्याय निरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकि र्मुनि पुङ्गवम्।। १
कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः।। २
चारित्रेण च को युक्तः सर्वभूतेषु को हितः।
विद्वान् कः कस्समर्थश्च कश्चैक प्रियदर्शनः।। ३

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे।। ४
एत दिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे।
महर्षे! त्वं समर्थोऽसि ज्ञातु मेवं विधं नरम्।। ५
श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीके र्नारदो वचः।
श्रूयता मिति चामुन्त्र्य प्रहृष्टो वाक्य मब्रवीत्।। ६
बहवो! दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।
मुने वक्ष्या म्यहं बुद्ध्वा तै र्युक्त श्श्रूयतां नरः।। ७
इक्ष्वाकुवंश प्रभवो रामो नाम जनै श्श्रुतः।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी।। ८
बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः।
विपुलांसो महाबाहुः कंबुग्रीवो महाहनुः।। ९
महोरस्को महेष्वासो गूढजत्रु ररिंदमः।
आजानुबाहु स्सुशिराः सुललाट स्सुविक्रमः।। १०
सम स्समविभक्ताङ्गः स्निग्धवर्णः  प्रतापवान्।
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः।। ११
धर्मज्ञ स्सत्यसन्धश्च प्रजानां च हिते रतः।
यशस्वी ज्ञानसम्पन्नः शुचि र्वश्य स्समाधिमान्।। १२
प्रजापतिसम श्श्रीमान् धाता रिपुनिषूदनः।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता।। १३
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।
वेदवेदांग तत्त्वज्ञो धनुर्वेदे च निष्ठितः।। १४
सर्वशास्त्रार्थ तत्त्वज्ञः स्मृतिमान् प्रतिभानवान्।
सर्वलोक प्रिय स्साधुः अदीनात्मा विचक्षणः।। १५
सर्वदाऽभिगत स्सद्भिः समुद्र इव सिन्धुभिः।
आर्य स्सर्वसमश्चैव सदैक प्रियदर्शनः।। १६
स च सर्वगुणोपेतः कौसल्यानंदवर्धनः।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव।। १७
विष्णुना सदृशो वीर्ये सोमवत्प्रिय दर्शनः।
कालाग्नि सदृशः क्रोधे क्षमया पृथिवीसमः।। १८
धनदेन समस्त्यागे सत्ये धर्म इवापरः।
त मेवंगुणसम्पन्नं रामं सत्यपराक्रमम्।। १९
ज्येष्ठं श्रेष्ठगुणै र्युक्तं  प्रियं दशरथ स्सुतम्।

प्रकृतीनां हितै र्युक्तं  प्रकृति प्रिय काम्यया।। २०
यौवराज्येन संयोक्तु मैच्छ त्प्रीत्या महीपतिः।
तस्याभिषेक सम्भारान् दृष्ट्वा भार्याऽथ कैकयी।। २१
पूर्वं दत्तवरा देवी वरमेन मयाचत।
विवासनं च रामस्य भरतस्याभिषेचनम्।। २२
स तस्य वचना च्चैव धर्मपाशेन संयतः।
विवासयामास सुतं रामं दशरथः प्रियम्।। २३
स जगाम वनं वीरः प्रतिज्ञा मनुपालयन्।
पितु र्वचननिर्देशात् कैकेय्याः प्रियकारणात्।। २४
तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह।
स्नेहा द्विनयसंपन्नः सुमित्रानन्दवर्धनः।। २५
भ्रातरं दयितो भ्रातुः सौभ्रात्र मनुदर्शयन्।
रामस्य दयिता भार्या नित्यं प्राणसमाहिता।। २६
जनकस्य कुले जाता देवमायेव निर्मिता।
सर्वलक्षण सम्पन्ना नारीणा मुत्तमा वधूः।। २७
सीताऽप्यनुगता रामं शशिनं रोहिणी यथा।
पौरै रनुगतो दूरं पित्रा दशरथेन च।। २८
शृंगिबेर पुरे सूतं गंगाकूले व्यसर्जयत्।
गुह मासाद्य धर्मात्मा निषादाधिपतिं प्रियम्।। २९
गुहेन सहितो रामो लक्ष्मणेन च सीतया।
ते वनेन वनं गत्वा नदी स्तीर्त्वा बहूदकाः।। ३०
चित्रकूट मनुप्राप्य भरद्वाजस्य शासनात्।
रम्य मावसथं कृत्वा रममाणा वने त्रयः।। ३१
देवगंधर्व सङ्काशाः तत्र ते न्यवसन् सुखम्।
चित्रकूटं गते रामे पुत्रशोकातुर स्तदा।। ३२
राजा दशरथ स्स्वर्गं जगाम विलपन् सुतम्।
मृते तु तस्मिन् भरतो वसिष्ठ प्रमुखै र्द्विजैः।। ३३
नियुज्यमानो राज्याय नैच्छ द्राज्यं महाबलः।
स जगाम वनं वीरो रामपाद प्रसादकः।। ३४
गत्वा तु स महात्मानं रामं सत्यपराक्रमम्।
अयाच द्भ्रातरं रामं आर्यभावपुरस्कृतः।। ३५
त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत्।
रामोऽपि परमोदारः सुमुख स्सुमहायशाः।। ३६

नचैच्छ त्पितु रादेशात् राज्यं रामो महाबलः।
पादुके चास्य राज्याय न्यासं दत्वा पुनः पुनः।। ३७
निवर्तयामास ततो भरतं भरताग्रजः।
स काम मनवाप्यैव रामपादा वुपस्पृशन्।। ३८
नन्दिग्रामेऽकरोद्राज्यं रामागमन कांक्षया।
गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः।। ३९
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च।
तत्रागमन मेकाग्रो दण्डकान् प्रविवेश ह।। ४०
प्रविश्य तु महारण्यं रामो राजीवलोचनः।
विराधं राक्षसं हत्वा शरभंगं ददर्श ह।। ४१
सुतीक्ष्णं चाप्यगस्त्यञ्च अगस्त्य भ्रातरं तथा।
अगस्त्य वचना च्चैव जग्राहैन्द्रं शरासनम्।। ४२
खड्गं च परम प्रीतः तूणी चाक्षय सायकौ।
वसत स्तस्य रामस्य वने वनचरै स्सह।। ४३
ऋषयोऽभ्यागमन् सर्वे वधायासुर रक्षसाम्।
स तेषां प्रतिशुश्राव राक्षसानां तथा वने।। ४४
प्रतिज्ञातश्च रामेण वध स्संयति रक्षसाम्।
ऋषीणामग्नि कल्पानां दण्डकारण्य वासिनाम्।। ४५
तेन तत्रैव वसता जनस्थाननिवासिनी।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी।। ४६
तत श्शूर्पणखावाक्यात् उद्युक्तान् सर्वराक्षसान्।
खरं त्रिशिरसं चैव दूषणं चैव राक्षसम्।। ४७
निजघान रणे रामः तेषांचैव पदानुगान्।
वने तस्मि न्निवसता जनस्थान निवासिनाम्।। ४८
रक्षसां निहता न्यासन् सहस्राणि चतुर्दश।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः।। ४९
सहायं वरयामास मारीचं नाम राक्षसम्।
वार्यमाण स्सुबहुशो मारीचेन स रावणः।। ५०
न विरोधो बलवता क्षमो रावण! तेन ते।
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः।। ५१
जगाम सहमारीचः तस्याश्रमपदं तदा।
तेन मायाविना दूरं अपवाह्य नृपात्मजौ।। ५२
जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम्।

गृध्रञ्च निहतं दृष्ट्वा ह्रतां श्रुत्वा च मैथिलीम्।। ५३
राघव श्शोकसन्तप्तो विललापाऽकुलेन्द्रियः।
तत स्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम्।। ५४
मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह।
कबन्धं  नाम रूपेण विकृतं घोर दर्शनम्।। ५५
तं निहत्य महाबाहुः ददाह स्वर्गतश्च सः।
स चास्य कथयामास शबरीं धर्मचारिणीम्।। ५६
श्रमणीं धर्मनिपुणां अभिगच्छेति राघव।
सोऽभ्यगच्छ न्महातेजाः शबरीं शत्रुसूदनः।। ५७
शबर्या पूजितस्सम्यक् रामो दशरथात्मजः।
पम्पातीरे हनुमता सङ्गतो वानरेण ह ।। ५८
हनुमद्वचना च्चैव सुग्रीवेण समागतः।
सुग्रीवाय च तत्सर्वं शंस द्रामो महाबलः।। ५९
आदित स्तद्यथावृत्तं सीताया श्च विशेषतः।
सुग्रीव श्चापि तत्सर्वं श्रुत्वा रामस्य वानरः।। ६०
चकार सख्यं रामेण प्रीतश्चै वाग्निसाक्षिकम्।
ततो वानरराजेन वैरानुकथनं प्रति।। ६१
रामायावेदितं सर्वं प्रणया द्दुःखितेन च।
प्रतिज्ञातं च रामेण तदा वालिवधं प्रति।। ६२
वालिनश्च बलं तत्र कथयामास वानरः।
सुग्रीव श्शङ्कित श्चासीत् नित्यं वीर्येण राघवे।। ६३
राघव प्रत्ययार्थं तु दुंदुभेः काय मुत्तमम्।
दर्शयामास सुग्रीवो महापर्वत सन्निभम्।। ६४
उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः।
पादांगुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम्।। ६५
बिभेद च पुन स्सालान् सप्तैकेन महेषुणा।
गिरिं रसातलं चैव जनयन् प्रत्ययं तदा।। ६६
ततः प्रीतमना स्तेन विश्वस्त स्स महाकपिः।
किष्किन्धां रामसहितो जगाम च गुहां तदा।। ६७
ततोऽ गर्ज द्धरिवरः सुग्रीवो हेमपिंगळः।
तेन नादेन महता निर्जगाम हरीश्वरः।। ६८
अनुमान्य तदा तारां सुग्रीवेण समागतः।
निजघान च तत्रैनं शरेणैकेन राघवः।। ६९

तत स्सुग्रीववचनात् हत्वा वालिन माहवे।
सुग्रीव मेव तद्राज्ये राघवः प्रत्यपादयत्।। ७०
स च सर्वान् समानीय वानरान् वानरर्षभः।
दिशः प्रस्थापयामास दिदृक्षु र्जनकात्मजाम्।। ७१
ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली।
शतयोजन विस्तीर्णं पुप्लुवे लवणार्णवम्।। ७२
तत्र लङ्कां समासाद्य पुरीं रावणपालिताम्।
ददर्श सीतां ध्यायन्तीं अशोकवनिकां गताम्।। ७३
निवेदयित्वाऽभिज्ञानं प्रवृत्तिं च निवेद्य च।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम्।। ७४
पञ्च सेनाग्रगान् हत्वा सप्तमन्त्रि सुतानपि।
शूर मक्षंच निष्पिष्य ग्रहणं समुपागमत्।। ७५
अस्त्रेणोन्मुक्त मात्मानं ज्ञात्वा पैतामहा द्वरात्।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया।। ७६
ततो दग्ध्वा पुरीं लङ्कां ऋते सीतां च मैथिलीम्।
रामाय प्रिय माख्यातुं पुन राया न्महाकपिः।। ७७
सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम्।
न्यवेदयत् अमेयात्मा दृष्टा सीतेति तत्त्वतः।। ७८
ततस्सुग्रीव सहितो गत्वा तीरं महोदधेः।
समुद्रं क्षोभयामास शरै रादित्य सन्निभैः।। ७९
दर्शयामास चात्मानं समुद्र स्सरितां पतिः।
समुद्रवचना च्चैव नलं सेतु मकारयत्।। ८०
तेन गत्वा पुरीं लङ्कां हत्वा रावण माहवे।
राम स्सीता मनुप्राप्य परां व्रीडा मुपागमत्।। ८१
ता मुवाच ततो रामः परुषं जनसंसदि।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती।। ८२
ततोऽग्निवचना त्सीतां ज्ञात्वा विगतकल्मषाम्।
बभौ राम स्सम्प्रहृष्टः पूजित स्सर्वदैवतैः।। ८३
कर्मणा तेन महता त्रैलोक्यं सचराचरम्।
सदेवर्षिगणं तुष्टं राघवस्य महात्मनः।। ८४
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम्।
कृतकृत्य स्तदा रामो विज्वरः प्रमुमोद ह।। ८५
देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान्।

अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः।। ८६
भरद्वाजाश्रमं गत्वा राम स्सत्यपराक्रमः।
भरत स्यान्तिकं रामो हनूमन्तं व्यसर्जयत्।। ८७
पुन राख्यायिकां जल्पन् सुग्रीवसहितश्च सः।
पुष्पकं त त्समारुह्य नन्दिग्रामं ययौ तदा।। ८८
नन्दिग्रामे जटान् हित्वा भ्रातृभि स्सहितोऽनघः।
राम स्सीता मनुप्राप्य राज्यं पुन रवाप्तवान्।। ८९
प्रहृष्टो मुदितो लोकः तुष्टः पुष्ट स्सुधार्मिकः।
निरामयो ह्यरोगश्च दुर्भिक्ष भयवर्जितः।। ९०
न पुत्र मरणं किञ्चित् द्रक्ष्यन्ति पुरुषाः क्वचित्।
नार्य श्चाविधवा नित्यं भविष्यन्ति पतिव्रताः।। ९१
न चाग्निजं भयं किञ्चित् नाप्सु मज्जन्ति जन्तवः।
न वातजं भयं किञ्चित् नापि ज्वरकृतं तथा।। ९२
न चापि क्षुद्भयं तत्र न तस्करभयं तथा।
नगराणि च राष्ट्राणि धन धान्ययुतानि च।। ९३
नित्यं प्रमुदिता स्सर्वे यथा कृतयुगे तथा।
अश्वमेधशतै रिष्ट्वा तथा बहुसुवर्णकैः।। ९४
गवां कोट्ययुतं दत्वा ब्रह्मलोकं प्रयास्यति।
असंख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः।। ९५
राजवंशान् शतगुणान् स्थापयिष्यति राघवः।
चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति।। ९६
दशवर्ष सहस्राणि दशवर्षशतानि च।
रामो राज्य मुपासित्वा ब्रह्मलोकं प्रयास्यति।। ९७
फलश्रुतिः
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम्।
यः पठे द्रामचरितं सर्वपापैः प्रमुच्यते।। ९८
एतदाख्यान मायुष्यं पठन् रामायणं नरः।
सपुत्रपौत्र स्सगणः प्रेत्य स्वर्गे महीयते।। ९९
पठन् द्विजो वागृषभत्व मीयात्
स्यात् क्षत्रियो भूमि पतित्व मीयात्।
वणिग्जनः पण्य फलत्व मीयात्
जनश्च शूद्रोऽपि महत्त्व मीयात्।। १००
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये

बालकाण्डे श्रीरामायण कथा संक्षेपो नाम प्रथमस्सर्गः
संक्षेप रामायणं संपूर्णम्

संक्षेप रामायण समापन श्लोकाः
(श्रीमद्रामायण पारायण समापने अनुसंधेय श्लोकक्रमः)

एव मेत त्पुरावृत्तं आख्यानं भद्रमस्तु वः।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्।। १

लाभ स्तेषां जय स्तेषां कुत स्तेषां पराभवः।
येषा मिन्दीवरश्यामो हृदये सुप्रतिष्ठितः।। २

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितो ब्राह्मणा स्सन्तु निर्भयाः।। ३

कावेरी वर्धतां काले काले वर्षतु वासवः।
श्रीरङ्गनाथो जयतु श्री रङ्ग श्रीश्च वर्धताम्।। ४

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्य श्शुभमस्तु नित्यं
लोकास्समस्ता स्सुखिनो भवन्तु ।। ५

मंगळं कोसलेन्द्राय महनीय गुणाब्धये।
चक्रवर्ति तनूजाय सार्वभौमाय मंगळम्।। ६

वेदवेदान्त वेद्याय मेघश्यामलमूर्तये।
पुंसां मोहनरूपाय पुण्यश्लोकाय मंगळम्।। ७

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः।
भाग्यानां परिपाकाय भव्यरूपाय मंगळम्।। ८

पितृभक्ताय सततं भ्रातृभि स्सह सीतया।
नन्दिताखिललोकाय रामभद्राय मंगळम् ।। ९

त्यक्तसाकेत वासाय चित्रकूट विहारिणे ।
सेव्याय सर्वयमिनां धीरोदाराय मंगळम् ।। १०

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।
संसेव्याय सदा भक्त्या स्वामिने मम मंगळम् ।। ११

दंडकारण्यवासाय खंडितामरशत्रवे ।
गृध्रराजाय भक्ताय मुक्तिदायास्तु मंगळम् ।। १२

सादरं शबरीदत्त फलमूलाभिलाषिणे ।
सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मंगळम् । १३

हनुमत्समवेताय हरीशाभीष्टदायिने ।
वालि प्रमथनायास्तु महाधीराय मंगळम् ।। १४
श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।
जितराक्षसराजाय रणधीराय मंगळम् ।। १५
आसाद्य नगरीं दिव्यां अभिषिक्ताय सीतया ।
राजाधिराजराजाय रामभद्राय मङ्गळम् ।। १६
मंगळाशासनपरैः मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वै राचार्यैः सत्कृतायास्तु मङ्गळम् ।।१७
कायेन वाचा मनसेन्द्रियै र्वा
बुद्ध्यात्मना वा प्रकृते स्स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि ।। १८
श्रीमन्नारायणायेति समर्पयामि
सर्वं श्रीकृष्णार्पणमस्तु

# श्रीहयग्रीवस्तोत्रमु

ज्ञानानंद मयं देवं निर्मलस्फटिका कृतिम्।
आधारं सर्वविद्यानां हयग्रीव मुपास्महे ।। १
स्वतस्सिद्धं शुद्धस्फटिकमणिभूभृत्प्रतिभटं
सुधा सध्रीचीभिः द्युतिभि रवदात त्रिभुवनम् ।
अनंतैः त्रय्यंतैः अनुविहित हेषा हलहलं
हताशेषावद्यं हयवदन मीडीमहि महः ।। २
समाहारस्साम्नां प्रतिपद मृचां धाम यजुषां
लयः प्रत्यूहानां लहरिविततिः बोधजलधेः ।
कथा दर्पक्षुभ्य त्कथककुलकोलाहलभवं
हरत्वंत र्ध्वांतं हयवदन हेषा हलहलः ।। ३
प्राची संध्या काचि दंतर्निशायाः
प्रज्ञादृष्टेरंजन श्री रपूर्वा ।
वक्त्री वेदान् भातु मे वाजिवक्त्रा
वागीशाख्या वासुदेवस्य मूर्तिः ।। ४
विशुद्ध विज्ञानघनस्वरूपं
विज्ञान विश्राणन बद्धदीक्षम् ।

दयानिधिं देहभृतां शरण्यं
देवं हयग्रीव महं प्रपद्ये ।। ५
अपौरुषेयै रपि वाक्प्रपंचैः
अद्यापि ते भूति मदृष्टपाराम् ।
स्तुवन्नहं मुग्ध इति त्वयैव
कारुण्यतो नाथ कटाक्षणीयः।। ६
दाक्षिण्य रम्या गिरिशस्य मूर्तिः
देॅवी सरोजासन धर्मपत्नी ।
व्यासादयोऽपि व्यपदेश्यवाचः
स्फुरंति सर्वे तव शक्ति लेशैः ।। ७
मंदोऽभविष्य न्नियतं विरिंचो
वाचां निधे! वंचित भागधेयः ।
दैत्यापनीतान् दययैव भूयोऽपि
अध्यापयिष्यो निगमान् नचे त्त्वम् ।। ८
वितर्कडोलां व्यवधूय सत्त्वे
बृहस्पतिं वर्तयसे यत स्त्वम् ।
तेनैव देव! त्रिदशेश्वराणां
अस्पृष्ट डोलायित माधिराज्यम् ।। ९
अग्नौ समिद्धार्चिषि सप्ततंतोः
आतस्थिवान् मंत्रमयं शरीरम् ।
अखंडसारैः हविषां प्रदानैः
आप्यायनं व्योमसदां विधत्से ।। १०
यन्मूल मीदृ क्प्रतिभाति तत्त्वं
या मूल माम्नाय महाद्रुमाणाम् ।
तत्त्वेन जानंति विशुद्ध सत्त्वाः
त्वा मक्षरा मक्षर मातृकां ते ।। ११
अव्याकृतात् व्याकृतवानसि त्वं
नामानि रूपाणि च यानि पूर्वम् ।
शंसंति तेषां चरमां प्रतिष्ठां
वागीश्वर! त्वां त्वदुपज्ञ वाचः ।। १२
मुग्धेंदु निष्यंद विलोभनीयां
मूर्तिं तवानंद सुधा प्रसूतिम् ।।
विपश्चित श्चेतसि भावयन्ते

वेला मुदारा मिव दुग्धसिंधोः ।। १३
मनोगतं पश्यति य स्सदा त्वां
मनीषिणां मानस राजहंसम् ।
स्वयं पुरोभाव विवादभाजः
किं कुर्वते तस्य गिरो यथार्हम् ।। १४
अपि क्षणार्धं कलयंति ये त्वां
आऍ्लावयंतं विशदैः मयूखैः ।
वाचां प्रवाहैः अनिवारितै स्ते
मंदाकिनीं मंदयितुं क्षमंते. ।। १५
स्वामिन्! भवद्ध्यान सुधाभिषेकात्
वहंति धन्याः पुलकानुबंधम् ।
अलक्षिते क्वापि निरूढमूलं
अंगेष्विवानंदथु मंकुरंतम्.।। १६
स्वामिन् ! प्रतीचा हृदयेन धन्याः
त्वद्ध्यान चंद्रोदय वर्धमानम्।
अमांत मानंद पयोधिमंतः
पयोभि रक्षाणं परिवाहयंति ।। १७
स्वैरानुभावाः त्वदधीनभावाः
समृद्धवीर्या स्त्वदनुग्रहेण ।
विपश्चितो नाथ! तरंति मायां
वैहारिकीं मोहन पिंछिकां ते ।। १८
प्राङ्निर्मितानां तपसां विपाकाः(त्)
प्रत्यग्र निश्श्रेयस संपदो मे ।
समेधिषीरं स्तव पादपद्मे
संकल्प चिंतामणयः प्रणामाः ।। १९
विलुप्तमूर्धन्य लिपिक्रमाणां
सुरेंद्र चूडापद लालितानाम् ।
त्वदंघ्रि राजीव रजः कणानां
भूयान् प्रसादो मयि नाथ! भूयात्. ।। २०
परिस्फुर न्नूपुर चित्रभानु
प्रकाश निर्धूत तमोनुषंगाम् ।
पदद्वयीं ते परिचिन्महेऽन्तः
प्रबोध राजीव विभात संध्याम्. ।। २१

त्व त्किंकरालंकरणो चितानां
त्वयैव कल्पांतर पालितानाम् ।
मंजुप्रणादं मणिनूपुरं ते
मंजूषिकां वेदगिरां प्रतीमः ।। २२
संचिंतयामि प्रतिभा दशास्थान्
संधुक्षयंतं समय प्रदीपान् ।
विज्ञान कल्पद्रुम पल्लवाभं
व्याख्यानमुद्रा मधुरं करं ते ।। २३
चित्ते करोमि स्फुरिताक्षमालं
सव्येतरं नाथ! करं त्वदीयम् ।
ज्ञानामृतोदंचन लालसानां
लीलाघटीयंत्र मिवाश्रितानाम् ।। २४
प्रबोधसिंधो ररुणैः प्रकाशैः
प्रवाळ संघात मिवोद्वहंतम् ।
विभावये देव! सपुस्तकं ते
वामं करं दक्षिण माश्रितानाम्. ।। २५
तमांसि भित्वा विशदैः मयूखैः
संप्रीणयंतं विदुष श्चकोरान् ।
निशामये त्वां नवपुंडरीके
शरद्घने चंद्र मिव स्फुरंतम् ।। २६
दिशंतु मे देव! सदा त्वदीयाः
दयातरंगानुचराः कटाक्षाः ।
श्रोत्रेषु पुंसा ममृतं क्षरंतीं
सरस्वतीं संश्रित कामधेनुम् ।। २७
विशेषवित्पारिषदेषु नाथ!
विदग्ध गोष्ठी समरांगणेषु ।
जिगीषतो मे कवितार्किकेंद्रान्
जिह्वाग्र सिहासन मभ्युपेयाः ।। २८
त्वां चिंतयन् त्वन्मयतां प्रपन्नः
त्वा मुद्गृणन् शब्दमयेन धाम्ना ।
स्वामिन्! समाजेषु समेधिषीय
स्वच्छंद वादाहव बद्धशूरः ।। २९
नानाविधानामगतिः कलानां

नचापि तीर्थेषु कृतावतारः ।
ध्रुवं तवानाथ परिग्रहायाः
नवं नवं पात्र महं दयायाः ।। ३०
अकंपनीया न्यपनीतिभेदैः
अलंकृषीरन् हृदयं मदीयम् ।
शंकाकळंकापग मोज्ज्वलानि
तत्त्वानि सम्यंचि तव प्रसादात् ।। ३१
व्याख्या मुद्रां करसरसिजैः पुस्तकं शंखचक्रे
बिभ्रद्भिन्न स्फटिक रुचिरे पुंडरीके निषण्णः ।
अम्लान श्री रमृत विशदैः अंशुभिः ऐ्लावयन्मां
आविर्भूयात् अनघ महिमा मानसे वागधीशः ।। ३२
वागर्थसिद्धि हेतोः पठत हयग्रीव संस्तुतिं भक्त्या ।
कवितार्किक केसरिणा वेंकटनाथेन विरचिता मेताम् ।। ३३
कवितार्किक सिंहाय कल्याण गुणशालिने ।
श्रीमते वेंकटेशाय वेदांतगुरवे नमः ।। ३४

## यतिराज विंशतिः

य स्त्सुतिं यतिपति प्रसादनीं
व्याजहार यतिराजविंशतिम्।
तं प्रपन्न जनचातकाम्बुदं
नौमि सौम्यवरयोगिपुङ्गवम्।।
श्रीमाधवाङ्घ्रिजलजद्वयनित्य सेवा
प्रेमाविलाशयपराङ्कुश पादभक्तम् ।
कामादिदोषहर मात्मपदाश्रितानां
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना ।। १
श्रीरङ्गराजचरणाम्बुजराजहंसं
श्रीमत्पराङ्कुश पदाम्बुजभृङ्गराजम् ।
श्रीभट्टनाथपरकाल मुखाब्जमित्रं
श्रीवत्सचिह्नशरणं यतिराज मीडे ।। २
वाचा यतीन्द्र! मनसा वपुषा च युष्मत्
पादारविन्दयुगळं भजतां गुरूणाम् ।

कूराधिनाथ कुरुकेश मुखाद्यपुंसां
पादानुचिन्तनपर स्सततं भवेयम् ।। ३
नित्यं यतीन्द्र! तव दिव्यवपुस्स्मृतौ मे
सक्तं मनो भवतु वाग्गुणकीर्तनेऽसौ ।
कृत्यं च दास्यकरणे तु करद्वयस्य
वृत्त्यन्तरेऽस्तु विमुखं करणत्रयं च ।। ४
अष्टाक्षराख्यमनुराजपदत्रयार्थ
निष्ठां, ममात्र वितराद्य यतीन्द्रनाथ ।
शिष्टाग्रगण्य जनसेव्यभवत्पदाब्जे
हृष्टाऽस्तु नित्य मनुभूय ममास्य बुद्धिः ।। ५
अल्पापि मे न भवदीयपदाब्जभक्तिः
शब्दादिभोगरुचिरन्वह मेधते हा ।
मत्पापमेव हि निदान ममुष्य नान्यत्
तद्वारयार्य यतिराज! दयैकसिन्धो ।। ६
वृत्त्या पशु र्नरवपुस्त्वह मीदृशोऽपि
श्रुत्यादिसिद्ध निखिलात्मगुणाश्रयोऽयम् ।
इत्यादरेण कृतिनोऽपि मिथः प्रवक्तुं
अद्यापि वञ्चनपरोऽत्र यतीन्द्र वर्ते ।। ७
दुःखावहोऽहमनिशं तव दुष्टचेष्टः
शब्दादिभोगनिरत श्शरणागताख्यः ।
त्वत्पादभक्त इव शिष्टजनौघमध्ये
मिथ्या चरामि यतिराज! ततोऽस्मि मूर्खः ।। ८
नित्यं त्वहं परिभवामि गुरुं च मन्त्रं
तद्देवता मपि न किंचि दहो बिभेमि ।
इत्थं शठोऽप्यशठव द्भवदीयसङ्घे
धृ(ह्व)ष्टश्चरामि यतिराज ततोऽस्मि मूर्खः ।। ९
हा! हन्त! हन्त मनसा क्रियया च वाचा
योऽहं चरामि सततं त्रिविधापचारान् ।
सोऽहं तवाप्रियकरः प्रियकृद्वदेव
कालं नयामि यतिराज! ततोऽस्मि मूर्खः ।। १०
पापे कृते यदि भवन्ति भयानुतापऽ
लज्जाः, पुनः करण मस्य कथं घटेत ।
मोहेन मे न भवतीह भयादिलेशः

तस्मा त्पुनः पुन रघं यतिराज! कुर्वे ।। ११
अन्तर्बहिस्सकलवस्तुषु सन्तमीशं
अन्धः पुरः स्थित मिवाह मवीक्षमाणः ।
कन्दर्पवश्यहृदय स्सततं भवामि
हन्त ! त्वदग्रगमनस्य यतीन्द्र! नार्हः ।। १२
तापत्रयी जनितदुःखनिपातिनोऽपि
देहस्थितौ मम रुचिस्तु न तन्निवृत्तौ ।
एतस्य कारणमहो! मम पापमेव
नाथ! त्वमेव हर तद्यतिराज! शीघ्रम् ।। १३
वाचामगोचर महागुण देशिकाग्र्य
कुराधिनाथकथिताखिल नैच्यपात्रम् ।
एषोऽहमेव न पुनर्जगतीदृशस्तत्
रामानुजार्य करुणैवतु मद्गतिस्ते ।। १४
शुद्धात्म यामुनगुरूत्तम कूरनाथ!
भट्टाख्यदेशिकवरोक्त समस्तनैच्यम् ।
अद्यास्त्यसंकुचितमेव मयीह लोके
तस्मा द्यतींद्र! करुणैव तु मद्गतिस्ते ।। १५
शब्दादिभोगविषया रुचि रस्मदीया
नष्टा भवत्विह भवद्दयया यतींद्र! ।
त्वद्दास दासगणना चरमावधौ यः
तद्दासतैकरसताऽविरता ममास्तु ।। १६
श्रुत्यग्रवेद्य निजदिव्यगुण स्वरूपः
प्रत्यक्षता मुपगतस्त्विह रङ्गराजः ।
वश्य स्सदा भवति ते यतिराज ! तस्मात्
शक्तः स्वकीयजनपापविमोचने त्वम् ।। १७
कालत्रयेऽपि करणत्रय निर्मिताति ऽ
पापक्रियस्य शरणं भगवत् क्षमैव ।
सा च त्वयैव कमलारमणेऽर्थिता यत्
क्षेम स्स एव हि यतीन्द्र ! भवच्छ्रितानाम्।। १८
श्रीमन् यतींद्र! तव दिव्यपदाब्ज सेवां
श्रीशैलनाथ करुणा परिणामदत्ताम् ।
ता मन्वहं मम विवर्धय नाथ! तस्याः
कामं विरुद्धमखिलं च निवर्तय त्वम् ।। १९
विज्ञापनं यदिद मद्य तु मामकीनं

अङ्गीकुरुष्व यतिराज! दयाम्बुराशे! ।
अज्ञोऽय मात्मगुणलेश विवर्जितश्च
तस्मा दनन्यशरणो भवतीति मत्वा ।। २०
इति यतिकुलधुर्यमेधमानैः
श्रुति मधुरै रुदितैः प्रहर्षयंतम् ।
वरवरमुनि मेव चिंतयन्ती
मति रिय मेति निरत्ययं प्रसादम् ।। २१
इति यतिराज विंशति स्समाप्ता

# श्री आळवन्दार् स्तोत्रम्

(स्तोत्ररत्नम्)

स्वादय न्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम्
स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ।।
नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ।।
नमोऽचिन्त्याद्भुताक्लिष्ट ज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाध भगवद्भक्ति सिन्धवे ।। १
तस्मै नमो मधुजिदङ्घ्रिसरोजतत्त्व
ज्ञानानुरागमहिमातिशयान्तसीम्ने ।
नाथाय नाथमुनयेऽत्र परत्र चापि
नित्यं यदीयचरणौ शरणं मदीयम् ।। २
भूयो नमोऽपरिमिताच्युत भक्तितत्त्व
ज्ञानामृताब्धि परिवाह शुभैर्वचोभिः ।
लोकेऽवतीर्ण परमार्थ समग्रभक्ति
योगाय नाथमुनये यमिनां पराय ।। ३
तत्त्वेन यश्चिदचिदीश्वर तत्स्वभाव
भोगापवर्ग तदुपायगती रुदारः ।
सन्दर्शय न्निरमिमीत पुराणरत्नं
तस्मै नमो मुनिवराय पराशराय ।। ४
माता पिता युवतय स्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपते र्वकुळाभिरामं
श्रीमत्तदङ्घ्रि युगळं प्रणमामि मूर्ध्ना ।। ५

यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्
अस्मन्मनोरथपथ स्सकल स्समेति ।
स्तोष्यामि नः कुलधनं कुलदैवतं तत्
पादारविन्द मरविन्दविलोचनस्य ।। ६
तत्त्वेन यस्य महिमार्णव शीकराणुः
शक्यो न मातु मपि शर्व पितामहाद्यैः ।
कर्तुं तदीयमहिमस्तुति मुद्यताय
मह्यं नमोऽस्तु कवये निरपत्रपाय ।। ७
यद्वा श्रमावधि यथामति वाऽप्यशक्तः
स्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः
वेदा श्चतुर्मुखमुखाश्च महार्णवान्तः
को मज्जतो रणुकुलाचलयो र्विशेषः ।। ८
किञ्चैष शक्त्यतिशयेन न तेऽनुकम्प्यः
स्तोताऽपितु स्तुतिकृतेन परिश्रमेण।
तत्र श्रमस्तु सुलभो मम मन्दबुद्धेः
इत्युद्यमोऽय मुचितो मम चाब्जनेत्र!।। ९
नावेक्षसे यदि ततो भुवनान्यमूनि
नालं प्रभो! भवितु मेव कुतः प्रवृत्तिः ।
एवं निसर्गसुहृदि त्वयि सर्वजन्तोः
स्वामिन्! न चित्र मिद माश्रित वत्सलत्वम् ।। १०
स्वाभाविकानवधिकातिशयेशितृत्वं
नारायण! त्वयि न मृष्यति वैदिकः कः ।
ब्रह्मा शिवश्शतमखः परमस्स्वराडिति
एतेऽपि यस्य महिमार्णव विप्रुषस्ते ।। ११
कश्श्रीश्श्रियः परमसत्त्वसमाश्रयः कः
कः पुण्डरीकनयनः पुरुषोत्तमः कः ।
कस्यायुतायुतशतैककलांशकांशे
विश्वं विचित्रचिदचित्प्रविभागवृत्तम् ।। १२
वेदापहार गुरुपातक दैत्यपीडादि
आपद्विमोचनमहिष्ठ फलप्रदानैः ।
कोऽन्यः प्रजापशुपती परिपाति कस्य
पादोदकेन स शिव स्स्वशिरोधृतेन ।। १३
कस्योदरे हर विरिञ्चिमुखः प्रपञ्चः

को रक्षती ममजनिष्ट च कस्य नाभेः ।
क्रान्त्वा निगीर्य पुन रुद्गिरति त्वदन्यः
कः केन वैष परवानिति शक्यशङ्कः ।। १४
त्वां शीलरूपचरितैः परमप्रकृष्ट
सत्त्वेन सात्त्विकतया प्रबलैश्च शास्त्रैः।
प्रख्यातदैव परमार्थविदां मतैश्च
नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम् ।। १५
उल्लङ्घित त्रिविधसी मसमातिशायि
सम्भावनं तव परिब्रढिमस्वभावम् ।
मयाबलेन भवताऽपि निगूह्यमानं
पश्यन्ति केचि दनिशं त्वदनन्यभावाः ।। १६
यदण्डमण्डान्तर गोचरञ्च यत्
दशोत्तराण्यावरणानि यानि च ।
गुणाः प्रधानं पुरुषः परम्पदं
परात्परं ब्रह्म च ते विभूतयः ।। १७
वशी वदान्यो गुणवा नृजु श्शुचिः
मृदु र्दयालु र्मधुरस्थिरः स्समः ।
कृती कृतज्ञस्त्वमसि स्वभावतः
समस्तकल्याणगुणामृतोदधिः ।। १८
उपर्युपर्यब्जभुवोऽपि पूरुषान्
प्रकल्प्य ते ये शतमित्यनुक्रमात् ।
गिरस्त्वदेकैक गुणावधीप्सया
सदा स्थिता नोद्यमतोऽतिशेरते ।। १९
त्वदाश्रितानां जगदुद्भवस्थिति
प्रणाश संसार विमोचनादयः ।
भवन्ति लीलाविधयश्च वैदिकाः
त्वदीयगम्भीरमनोऽनुसारिणः ।। २०
नमो नमो वाङ्मनसातिभूमये
नमो नमो वाङ्मनसैकभूमये
नमो नमोऽनन्तमहाविभूतये
नमो नमोऽनन्त दयैकसिन्धवे ।। २१
न धर्मनिष्ठोऽस्मि नचात्मवेदी
न भक्तिमां स्त्वच्चरणारविन्दे ।

अकिञ्चनोऽनन्यगतिश्शरण्य!
त्वत्पादमूलं शरणंप्रपद्ये ।। २२
न निन्दितं कर्म तदस्ति लोके
सहस्रशो य न्न मया व्यधायि ।
सोऽहं विपाकावसरे मुकुन्द!
क्रन्दामि ! सम्प्रत्यगति स्तवाग्रे ।। २३
निमज्जतोऽनन्तभवार्ण वान्तः
चिराय मे कूलमिवाऽसि लब्धः ।
त्वयाऽपि लब्धं भगव न्निदानीं
अनुत्तमं पात्र मिदं दयायाः ।। २४
अभूतपूर्वं मम भावि किं वा
सर्वं सहे मे सहजं हि दुःखम् ।
किं तु त्वदग्रे शरणागतानां
पराभवो नाथ! न तेऽनुरूपः ।। २५
निरासकस्यापि न तावदुत्सहे
महेश! हातुं तव पादपङ्कजम् ।
रुषा निरस्तोऽपि शिशुः स्तनन्धयो
न जातु मातु श्चरणौ जिहासति ।। २६
तवामृत स्यन्दिनि पादपङ्कजे
निवेशितात्मा कथ मन्यदिच्छति ।
स्थितेऽरविन्दे मकरन्द निर्भरे
मधुव्रतो नेक्षुरकं हि वीक्षते ।। २७
त्वदङ्घ्रिमुद्दिश्य कदापि केनचित्
यथा तथावापि सकृत्कृतोऽञ्जलिः ।
तदैव मुष्णात्यशुभान्यशेषतः
शुभानि पुष्णाति न जातु हीयते ।। २८
उदीर्ण संसार दवाशुशुक्षणिं
क्षणेन निर्वाप्य पराञ्च निर्वृतिम् ।
प्रयच्छति त्वच्चरणारुणाम्बुज
द्वयानुरागामृत सिन्धुशीकरः ।। २९
विलास विक्रान्त परावरालयं
समस्य दार्तिक्षपणे कृतक्षणम् ।
धनं मदीयं तव पादपङ्कजं

कदानु साक्षात्करवाणि चक्षुषा ।। ३०
कदा पुनश्शङ्खरथाङ्गकल्पक
ध्वजारविन्दाङ्कुशवज्रलाञ्चनम् ।
त्रिविक्रम! त्वच्चरणाम्बुजद्वयं
मदीयमूर्धान मलङ्करिष्यति ।। ३१
विराजमानोज्ज्वल पीतवाससं
स्मितातसी सूनसमामलच्छविम् ।
निमग्ननाभिं तनुमध्यमुन्नतं
विशालवक्षस्थ्सलशोभिलक्षणम् ।। ३२
चकासतं ज्याकिणकर्कशैश्शुभैः
चतुर्भि राजानुविलम्बिभि र्भुजैः ।
प्रियावतंसोत्पल कर्ण भूषण
श्लथालकाबन्धविमर्दशंसिभिः ।। ३३
उदग्रपीनांस विलम्बिकुण्डल
अलकावलीबन्धुरकम्बुकन्धरम् ।
मुखश्रिया न्यक्कृत पूर्णनिर्मल
अमृतांशुबिम्बाम्बुरुहोज्ज्वलश्रियम् ।। ३४
प्रबुद्धमुग्धाम्बुजचारुलोचनं
सविभ्रम भ्रूलत मुज्ज्वलाधरम्।
शुचिस्मितं कोमलगण्डमुन्नसं
ललाटपर्यन्त विलम्बितालकम् ।। ३५
स्फुरत्किरीटाङ्गदहारकण्ठिका
मणीन्द्र काञ्चीगुणनूपुरादिभिः ।
रथाङ्गशङ्खासिगदाधनुर्वरैः
लसत्तुलस्या वनमालयोज्ज्वलम् ।। ३६
चकर्थ यस्या भवनं भुजान्तरं
तव प्रियं धाम यदीयजन्मभूः ।
जगत्समस्तं यदपाङ्गसंश्रयं
यदर्थ मम्भोधि रमन्थ्यबन्धि च ।। ३७
स्ववैश्वरूप्येण सदाऽनुभूतयापि
अपूर्ववद्विस्मयमादधानया ।
गुणेन रूपेण विलासचेष्टितैः
सदा तवै वोचितया तव श्रिया ।। ३८

तया सहासीनमनन्तभोगिनि
प्रकृष्ट विज्ञानबलैक धामनि ।
फणामणिव्रात मयूखमण्डल
प्रकाशमानोदर दिव्यधामनि ।। ३९
निवास शय्यासनपादुकांशुक
उपधानवर्षातपवारणादिभिः ।
शरीरभेदैस्तव शेषतांगतैः
यथोचितं शेष इतीरिते जनैः ।। ४०
दासस्सखा वाहन मासनं ध्वजो
यस्ते वितानं व्यजनं त्रयीमयः ।
उपस्थितं तेन पुरो गरुत्मता
त्वदङ्घ्रि सम्मर्द किणाङ्क शोभिना ।। ४१
त्वदीयभुक्तोज्झित शेषभोजिना
त्वया निसृष्टात्मभरेण यद्यथा ।
प्रियेण सेनापतिना न्यवेदि तत्
तथाऽनुजानन्त मुदारवीक्षणैः ।। ४२
हताखिल क्लेशमलैस्स्वभावतः
सदानुकूल्यैकरसै स्तवोचितैः ।
गृहीत तत्त त्परिचारसाधनैः
निषेव्यमाणं सचिवैर्यथोचितम् ।। ४३
अपूर्वनानारसभावनिर्भर
प्रबुद्धया मुग्धविदग्ध लीलया ।
क्षणाणुवत् क्षिप्तपरादिकालया
प्रहर्षयन्तं महिषीं महाभुजम्।। ४४
अचिन्त्य दिव्याद्भुत नित्ययौवन
स्वभावलावण्य मयामृतोदधिम् ।
श्रिय श्श्रियं भक्तजनैक जीवितं
समर्थ मापत्सख मर्थिकल्पकम् ।। ४५
भवन्त मेवा नुचर न्निरन्तरं
प्रशांत निश्शेष मनोरथान्तरः ।
कदाहमैकांतिक नित्यकिङ्करः
प्रहर्षयिष्यामि सनाथ जीवितः ।। ४६
धिगशुचि मविनीतं निर्दयं मामलज्जं

परमपुरुष! योऽहं योगिवर्याग्रगण्यैः ।
विधि शिव सनकाद्यैः ध्यातु मत्यन्तदूरं
तव परिजनभावं कामये कामवृत्तः ।। ४७
अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे! कृपया केवल मात्मसात्कुरु ।।४८
अविवेकघनान्ध दिङ्मुखे बहुधा सन्ततदुःखवर्षिणि ।
भगवन् ! भवदुर्दिने पथ स्खलितं मा मवलोक याच्युत! ।।४९
न मृषा परमार्थमेव मे शृणु विज्ञापनमेक मग्रतः ।
यदि मे न दयिष्यसे ततोः दयनीयस्तव नाथ दुर्लभः ।। ५०
तदहं त्वदृते न नाथवान्
मदृते त्वं दयनीयवा न्नच।
विधिनिर्मित मेत दन्वयं
भगवन्! पालय मास्म जीहपः।। ५१
वपुरादिषु योऽपि कोऽपि वा
गुणतोऽसानि यथातथाविधः ।
तदयं तव पादपद्मयोः
अह मद्यैव मया समर्पितः ।। ५२
मम नाथ! यदस्ति योऽस्म्यहं
सकलं तद्धि तवैव माधव! ।
नियतस्वमिति प्रबुद्धधीः
अथवा किंनु समर्पयामि ते ।। ५३
अवबोधितवा निमां यथा
मयि नित्यां भवदीयतां स्वयम् ।
कृपयैवमनन्य भोग्यतां
भगवन् ! भक्तिमपि प्रयच्छ मे ।। ५४
तव दास्यसुखैक संगिनां
भवनेष्वस्त्वपि कीटजन्म मे ।
इतरावसॆथेषु मास्मभूत्
अपि मे जन्म चतुर्मुखात्मना ।। ५५
सकृत्त्वदाकारविलोकनाशया
तृणीकृतानुत्तम भुक्तिमुक्तिभिः ।
महात्मभिर्मामवलोक्यतां नय
क्षणेऽपि ते यद्विरहोऽतिदुस्सहः ।। ५६

न देहं न प्राणान्न च सुख मशेषाभिलषितं
न चात्मानं नान्यत्किमपि तव शेषत्वविभवात् ।
बहिर्भूतं नाथ! क्षणमपि सहे यातु शतधा
विनाशं तत्सत्यं मधुमथन! विज्ञापन मिदम्।। ५७
दुरन्तस्यानादे रपरिहरणीयस्य महतो
निहीनाचारोऽहं नृपशुरशु भस्यास्पदमपि ।
दयासिन्धो! बन्धो! निरवधिक वात्सल्य जलधे!
तव स्मारं स्मारं गुणगुण मितीच्छामि गतभीः ।। ५८
अनिच्छन्न प्येवं यदि पुनरितीच्छन्निव रजः
तमश्छन्नश्छद्मस्तुति वचनभङ्गीमरचयम् ।
तथापीत्थं रूपं वचन मवलंब्यापि कृपया
त्वमे वैवं भूतं धरणिधर! मे शिक्षय मनः ।। ५९
पिता त्वं माता त्वं दयिततनयस्त्वं प्रियसुहृत्
त्वमेव त्वं मित्रं गुरुरसि गतिश्चासि जगताम् ।
त्वदीय स्त्वद्भृत्यस्तव परिजन स्त्वद्गति रहं
प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ।। ६०
जनित्वाऽहं वंशे महति जगति ख्यातयशसां
शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदाम् ।
निसर्गादेव त्वच्चरणकमलैकान्तमनसां
अधोधः पापात्मा शरणद! निमज्जामि तमसि ।। ६१
अमर्यादः क्षुद्र श्चलमति रसूयाप्रसवभूः
कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः ।
नृशंसः पापिष्ठः कथ मह मितो दुःखजलधेः
अपारादुत्तीर्णस्तव परिचरेयं चरणयोः ।। ६२
रघुवर! यदभूस्त्वं तादृशो वायसस्य
प्रणत इति दयालु र्यच्च चैद्यस्य कृष्ण!
प्रतिभव मपराद्धुर्मुग्ध! सायुज्यदोऽभूः
वद किमपद माग स्तस्य तेऽस्ति क्षमायाः ।। ६३
ननु प्रपन्नस्सकृदेव नाथ! , तवाहमस्मीति च याचमानः ।
तवानुकंप्यः स्मरतः प्रतिज्ञां, मदेकवर्जं किमिदं व्रतं ते।।६४
अकृत्रिमत्वच्चरणारविन्द, प्रेमप्रकर्षावधि मात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य, प्रसीद मद्वृत्त मचिन्तयित्वा ।।६५
यत्पदांभोरुहध्यान विध्वस्ताशेषकल्मषः ।
वस्तुता मुपयातोऽहं यामुनेयं नमामि तम्।।

# श्री नारायणाष्टकम्

(आर्तत्राणपरायणाष्टकम्)

वात्सल्यादभय प्रदान समया दार्तार्ति निर्वापणात्
औदार्या दघशोषणा दगणित श्रेयः पद प्रापणात् ।
सेव्यः श्रीपति रेक एव जगता मेतेऽभवन् साक्षिणः
प्रह्लाद श्च विभीषण श्च करिराट् पांचा ल्यहल्या ध्रुवः ।।१
प्रह्लादा स्ति यदीश्वरो वद हरिः सर्वत्र मे दर्शय
स्तंभे चैव मिति ब्रुवंत मसुरं तत्राविरासी द्धरिः ।
वक्ष स्तस्य विदारय न्निजनखैः वात्सल्य मापादायन्
आर्तत्राण परायणः स भगवान् नारायणो मे गतिः ।। २
श्रीरा॑मोऽत्र विभिषणो य मनघो रक्षोभया दागतः
सुग्रीवानय पालयैन मधुना पौलस्त्यमेवागतम् ।
इत्युक्त्वाऽभय मस्य सर्व विदितं यो राघवो दत्तवान्
आर्तत्राण परायणः स भगवान् नारायणो मे गतिः ।। ३
नकग्रस्त पदं समुद्धृतकरं ब्रह्मादयो भो सुराः
पाल्यंता मिति दीनवाक्य करिणं देवे ष्वशक्तेषु यः ।
मा भैषी रिति यस्य नक्र हनने चक्रायुधः श्रीधरः
आर्तत्राण परायणः स भगवान् नारायणो मे गतिः ।। ४
भो कृष्णाच्युत भो कृपालय हरे भो पांडवानां सखे
क्वासि क्वासि सुयोधना दपहृतां भो रक्ष मां आतुराम्।
इत्युक्तोऽक्षय वस्त्र संभृत तनुं योऽपालयत् द्रौपदीं
आर्तत्राण परायणः स भगवान् नारायणो मे गतिः ।। ५
यत्पादाब्ज नखोदकं त्रिजगतां पापौघ विध्वंसनं
य न्नामामृत पूरकं च पिबतां संसार संतारकम् ।
पाषाणोऽपि यदंघ्रिपद्म रजसा शापा न्मुने र्मोचितः
आर्तत्राण परायणः स भगवान् नारायणो मे गतिः ।। ६
पित्रा भ्रातर मुत्तमासन गतं चौत्तानपादि र्ध्रुवो
दृष्ट्वा तस्य समारुरुक्षुरधृतो मात्रावमानं गतः ।
यं गत्वा शरणं यदाप तपसा हेमाद्रि सिंहासनं
आर्तत्राण परायणः स भगवान् नारायणो मे गतिः ।। ७
आर्ता विषण्णाः शिथिला श्च भीताः, घोरेषु च व्याधिषु वर्तमानाः
संकीर्त्य नारायणशब्दमात्रं, विमुक्तदुःखाः सुखिनो भवंति

# श्रीमधुराष्टकमु

(श्रीवल्लभाचार्यविरचितम्)

अधरं मधुरं वदनं मधुरं
नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं
मधुराधिपते रखिलं मधुरम् ।। १

वचनं मधुरं चरितं मधुरं
वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं
मधुराधिपते रखिलं मधुरम् ।। २

वेणुर्मधुरो रेणु र्मधुरः
पाणि र्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं
मधुराधिपते रखिलं मधुरम् ।। ३

गीतं मधुरं पीतं मधुरं
भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं
मधुराधिपते रखिलं मधुरम् ।। ४

करणं मधुरं तरणं मधुरं
हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं
मधुराधिपते रखिलं मधुरम्।। ५

गुंजा मधुरा माला मधुरा
यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं
मधुराधिपते रखिलं मधुरम्।। ६

गोपी मधुरा लीला मधुरा
युक्तं मधुरं भुक्तं मधुरम् ।
इष्टं मधुरं शिष्टं मधुरं
मधुराधिपते रखिलं मधुरम् ।। ७

गोपा मधुरा गावो मधुराः
यष्टि र्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं
मधुराधिपते रखिलं मधुरम् ।। ८

# नृसिंहाष्टकम्

श्रीम दकलङ्क परिपूर्ण शशिकोटि
श्रीधर मनोहर सटापटल कान्त ! ।
पालय कृपालय! भवाम्बुधिनिमग्नं
दैत्यवरकाल! नरसिंह! नरसिंह! ।। १
पादकमलावनत पातकिजनानां
पातकदवानल! पतत्रि वर केतो!।
भावनपरायण! भवार्तिहरया मां
पाहि कृपयैव नरसिंह! नरसिंह!।। २
तुङ्ग नखपङ्क्ति दलितासुर वरासृक्
पङ्क नवकुङ्कुम विपङ्किल महोरः।
पण्डितनिधान! कमलालय! नमस्ते
पङ्कजनिषण्ण! नरसिंह! नरसिंह!।। ३
मौलिषु विभूषण मिवामर वराणां
योगिहृदयेषु च शिरस्सु निगमानाम् ।
राज दरविन्द रुचिरं पदयुगं ते
धेहि मम मूर्ध्नि नरसिंह! नरसिंह! ।। ४
वारिजविलोचन! मदन्तिम दशायां
क्लेश विवशीकृत समस्त करणायाम् ।
एहि रमया सह शरण्य! विहगानां
नाथ मधिरुह्य नरसिंह! नरसिंह!।। ५
हाटक किरीट वरहार वनमाला
तारशना मकरकुंडलमणींद्रैः ।
भूषित मशेषनिलयं तव वपु र्मे
चेतसि चकास्तु नरसिंह! नरसिंह!।। ६
इन्दु रवि पावक विलोचन! रमायाः
मन्दिर! महाभुज लसद्वर रथाङ्ग!।
सुन्दर! चिराय रमतां त्वयि मनो मे
नन्दित सुरेश! नरसिंह! नरसिंह! ।। ७
माधव! मुकुन्द! मधुसूदन! मुरारे!
वामन! नृसिंह! शरणं भव नतानाम् ।
कामद! घृणिन्! निखिलकारण! नयेयं
काल ममरेश! नरसिंह! नरसिंह!।। ८

अष्टकमिदं सकलपातक भयघ्नं
कामद मशेष दुरितामय रिपुघ्नम् ।
यः पठति सन्ततमशेष निलयं ते
गच्छति पदं स नरसिंह! नरसिंह! ।। ९
इति नरसिंहाष्टकं समाप्तम्

## श्रीजगन्नाथाष्टकम्

कदाचि त्कालिंदी तट विपिन संगीतक रवो
मुदा गोपीनारी वदन कमलास्वाद मधुपः ।
रमा शंभु ब्रह्माऽमरपति गणेशाऽर्चित पदो
जगन्नाथ स्वामी नयनपथगामी भवतु मे.।। १
भुजे सव्ये वेणुं शिरसि शिखिपिंछं कटितटे
दुकूलं नेत्रांते सहचर कटाक्षं विदधते।
सदा श्रीमद्बृंदावन वसति लीलापरिचयो
जगन्नाथ स्वामी नयनपथगामी भवतु मे.।। २
महांभोदे स्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादांत स्सहज बलभद्रेण बलिना ।
सुभद्रा मध्यस्थ स्सकल सुरसेवावसरदो
जगन्नाथ स्वामी नयनपथगामी भवतु मे.।। ३
कदा पारावार स्सजल जलदश्रेणि रुचिरो
रमा वाणी सोम स्फुर दमल पद्मोद्भवमुखैः ।
सुरेंद्रै राराध्यः श्रुतिगणशिखा गीतचरितो
जगन्नाथ स्वामी नयनपथ गामी भवतु मे.।। ४
रथारूढो गच्छन् पथि मिळित भूदेव पटलैः
स्तुति प्रादुर्भावं प्रतिपद मुपाकर्ण्य सदयः ।
दयासिंधु र्बंधुः सकल जगतां सिंधुसुतया
जगन्नाथ स्वामी नयनपथगामी भवतु मे.।। ५
परब्रह्मापीडः कुवलय दळोत्फुल्ल नयनो
निवासी नीलाद्रौ निहित चरणोऽनंत शिरसि।
रसानंदो राधा सरसवपु रालिंगन सुखो
जगन्नाथ स्वामी नयनपथ गामी भवतु मे.।। ६

न वै प्रार्थ्यं राज्यं न च कनकतां भोगविभवं
न याचेऽहं रम्यां निखिलजन काम्यां वरवधूम्।
सदा काले काले प्रमथपतिना गीतचरितो
जगन्नाथ स्वामी नयनपथ गामी भवतु मे. ।। ७
हर त्वं संसारं द्रुततर मसारं सुरपते
हर त्वं पापानां विततिं मपरां यादवपते।
अहो दीनानाथं निहित मचलं निश्चितपदं
जगन्नाथ स्वामी नयनपथ गामी भवतु मे.।। ८

## श्रीसुदर्शनाष्टकम्

प्रतिभट श्रेणि भीषण! वरगुण स्तोम भूषण!
जनिभय स्थान तारण! जगदवस्थान कारण! ।
निखिल दुष्कर्म कर्शन! निगम सद्धर्म दर्शन!
जय जय श्रीसुदर्शन! जय जय श्रीसुदर्शन ।। १
शुभ जगद्रूप मंडन! सुरजन त्रास खंडन!
शतमख ब्रह्मवंदित! शतपथ ब्रह्मनंदित! ।
प्रथित विद्व त्सपक्षित! भज दहिर्बुध्न्य लक्षित!
जयजय श्रीसुदर्शन! जय जय श्रीसुदर्शन! ।। २
निजपद प्रीत सद्गुण! निरुपधि स्फीत षड्गुण
निगम निर्व्यूढ वैभव! निज पर व्यूह वैभव! ।
हरिहय द्वेषि दारण! हर पुरऄ्लोष कारण!
जय जय श्रीसुदर्शन! जय जय श्रीसुदर्शन! ।। ३
स्फुट तटिज्जाल पिंजर! पृथुतर ज्वाल पंजर!
परिगत प्रत्न विग्रह! परिमित प्रज्ञ दुर्ग्रह! ।
प्रहरण ग्राम मंडित! परिजन त्राण पंडित!
जय जय श्रीसुदर्शन! जय जय श्रीसुदर्शन! ।। ४
भुवनेत स्त्रयीमय! सवनतेज स्त्रयीमय !
निरवधि स्वादु चिन्मय! निखिलशक्ते जगन्मय! ।
अमित विश्व क्रिया मय! शमित विष्व ग्भयामय!
जय जय श्रीसुदर्शन! जय जय श्रीसुदर्शन! ।। ५
महित संप त्सदक्षर! विहित संप त्सदक्षर!
षडरचक्र प्रतिष्ठित! सकलतत्त्व प्रतिष्ठित! ।

विविध संकल्प कल्पक! विबुध संकल्प कल्पक!
जय जय श्रीसुदर्शन! जय जय श्रीसुदर्शन! ।। ६
प्रतिमुखालीढ बंधुर! पृथु महा हेति दंतुर!
विकट माला परिष्कृत! विविध माया बहिष्कृत! ।
स्थिर महायंत्र यंत्रित! दृढ दयातंत्र यंत्रित!
जय जय श्रीसुदर्शन! जय जय श्रीसुदर्शन! ।। ७
दनुज विस्तार कर्तन! दनुज विद्या विकर्तन!
जनि तमिस्रा विकर्तन! भज दविद्या निकर्तन! ।
अमर दृष्ट स्वविक्रम! समर जुष्ट भ्रमिक्रम!
जयजय श्रीसुदर्शन! जय जय श्रीसुदर्शन! ।। ८
द्विचतुष्क मिदं प्रभूत सारं
पठतां वेंकटनायक प्रणीतम् ।
विषमेऽपि मनोरथः प्रधावन्
न विहन्येत रथांगधुर्यगुप्तः ।। ९

# परांकुशाष्टकम्

त्रैविद्य वृद्ध जनमूर्ध विभूषणं यत्
संपच्च सात्त्विकजनस्य यदेव नित्यम् ।
यद्वा शरण्य मशरण्यजनस्य पुण्यं
तत्संश्रयेम वकुळाभरणां घ्रियुग्मम् ।। १
भक्तिप्रभाव भवदद्भुत भावबन्ध
सन्धुक्षित प्रणयसार रसौघपूर्णः।
वेदार्थरत्ननिधि रच्युत दिव्यधाम
जीयात्परांकुश पयोधि रसीमभूमा ।। २
ऋषिं जुषामहे कृष्णतृष्णातत्त्व मिवोदितम् ।
सहस्रशाखां योऽद्राक्षीत् द्राविडीं ब्रह्मसंहिताम् ।। ३
यद्गोसहस्र मपहन्ति तमांसि पुंसां
नारायणो वसति यत्र सशंखचक्रः ।
यन्मंडलं श्रुतिगतं प्रणमन्ति विप्राः
तस्मै नमो वकुळभूषण भास्कराय ।। ४
पत्युः श्रियः प्रसादेन प्राप्त सार्वज्ञ संपदम् ।
प्रवन्नजनकूटस्थं प्रपद्ये श्रीपरांकुशम् ।। ५

शठकोपमुनिं वन्दे शठानां बुद्धिदूषणम् ।
अज्ञानां ज्ञानजनकं तिन्त्रिणी मूलसंश्रयम् ।। ६
वकुळाभरणं वन्दे जगदाभरणं मुनिम् ।
यः श्रुते रुत्तरं भागं चक्रे द्राविडभाषया ।। ७
वकुळालंकृतं श्रीमच्छठकोपपदद्वयम् ।
अस्मत्कुलधनं भोग्यमस्तु मे मूर्ध्नि भूषणम् ।। ८
नमज्जनस्य चित्त भित्ति भक्ति चित्र तूलिका
भवाहि वीर्य भंजने नरेन्द्र मन्त्र यन्त्रणा ।
प्रपन्नलोक कैरव प्रसन्नचारु चंद्रिका
शठारि हस्त मुद्रिका हठात्करोतु मे तमः ।। ९
परांकुशाष्टकमु समाप्तम्